पापादवश्यं नरकं व्रजंति पुनर्दरिद्री पुनरेव पापी॥५०२॥

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थं नोपलभ्यते ॥ ५०३ ॥

रामेति वर्णद्वयमादरेण सदा जपन्मुक्तिमुपैति जंतुः ।
कलौ युगे कल्मषमानसानामन्यत्र धर्मे खलु नाधिकारः ॥ [५०४ ॥

राजा राष्ट्रकृतं पापं राज्यपा ' पुरोहितं ।
स्त्रीपापं च भ्रतारस्य (!) शिष्यपापं गुरोरपि ॥ ५०५ ॥

परद्रव्येषु ये अंधाः परस्त्रीषु नपुंसकाः ।
परापवादे ये मूर्खाः तेषां गंगा पदे पदे ॥ ५०६ ॥

राजपत्नी गुरोः पत्नी भ्रातृपत्नी तथैव च ।
पत्नीमाता स्वमाता च पंचैते मातरः स्मृताः ॥ ५०७ ॥

जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पंचैते पितरः स्मृताः ॥ ५०८ ॥

एभिर्ग्रंथांतरे कारिका समाप्ता ॥

[Gaikawar.]

1559.

2007. Foll. 51; size 9 in. by 4 in.; fairly written, in Devanāgarī, in the latter part of last century; seven lines in a page.

The same treatise.

The two rather incorrect MSS. are evidently derived from the same original.

[Dr. J. Taylor.]

1560.

2172. Foll. 157; size 10¾ in. by 4½ in.; fairly written, in Devanāgarī; ten lines in a page.

Dharmapravṛitti, a compendium of religious observances, by *Nārāyaṇa Bhaṭṭa*.

It begins:

नारायणं नमस्कृत्य कामदां च सरस्वतीम् ।
गणनाथं गुरूंश्चैव धर्मसंरक्षणाय वै ॥ १ ॥*

धर्मप्रवृत्त्यै क्रियते कलौ नारायणेन तु ।
विदुषां कर्मनिष्ठानां संततिर्धर्मवर्धिनी ॥ २ ॥

आलोक्य धर्मशास्त्राणि मन्वादिभिः कृतानि वै ।
आश्वलायनसूत्रं च वृत्तिं नारायणीं तथा ॥ ३ ॥

सारमेव समुद्धृत्य स्मृतीनां वचनान्यथ ।
सिद्धान्तानि समूलानि समादायाथ चैव हि ॥ ४ ॥

वचनानि सतां चैव संमतानि मनीषिणाम् ।
ग्रन्थे ऽस्मिंस्तानि लिख्यन्ते धर्मप्रवृत्तिसंज्ञके ॥ ५ ॥

शौचादिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ।
तिथीनामपि सर्वासां निर्णयानप्यसंशयात् ॥ ६ ॥

योगीश्वरः ॥ यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत ।
धर्मसंरक्षणार्थाय तस्मिन्देशे वसेद्द्विजः ॥

उषःकाले कर्तव्यं ॥

उषःकाले समुत्थाय चिन्तयेदात्मनोदितम् ।
स्मृत्वा नारायणं देवं सौत्राण्यपि च संजपेत् ॥

* MS. 2063 adds here the following *śloka:*

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ २ ॥

अथ मौनविधिः ॥

प्रभाते मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं विधीयते ॥

अथ मूत्रोत्सर्गादिविधिः ॥ °

अथ शौचं fol. 2*a*; अथ गंडूषः fol. 3*a*; अथ दंतधावनं fol. 3*b*; अथ स्नानं fol. 4*a*; अथ वस्त्रविधिः fol. 6*b*; अथ सप्त स्नानानि fol. 7*b*; अथ कुशविधिः fol. 8*b*; अथ पवित्रलक्षणं fol. 9*b*; अथ यज्ञोपवीतं fol. 10*b*; अथ तिलकं fol. 11*a*; अथ भस्मधारणं fol. 12*a*; अथ संध्याकालः fol. 12*b*; अथ संध्याविधिः fol. 13*a*; अथ प्राणायामः fol. 14*a*; अथ मार्जनं ib.; अथार्घ्यदानं fol. 14*b*; अथासनानि fol. 15*a*; अथ जपविधिः fol. 15*b*; अथ कामपरत्वान्मालाविधिः fol. 16*b*; अथ रुद्राक्षधारणं ib.; अथ संध्योपासनं ib.; अथाभिवादनं fol. 17*a*; अथोपासनविधिः ib.; अथ समस्य होमः fol. 19*a*; अथ विभक्तविश्वदेवः fol. 21*b*; अथानग्निकवैश्वदेवः fol. 22*a*; अथ ब्रह्मयज्ञः fol. 22*b*; अथ तर्पणं fol. 23*a*; अथ तिलतर्पणं fol. 24*a*; अथ श्राद्धाहे तर्पणं fol. 25*a*.

इति° शौचादितर्पणांतं प्रकरणं। अथ दिनातीतकर्माण्याह fol. 25*b*; अथ देवतार्चनं fol. 26*a*; अथ नित्यश्राद्धं fol. 27*b*; अथ भोजनविधिः fol. 28*a*; अथ वमनविधिः fol. 33*a*; अथ तांबूलविधिः ib.; अथ सायंकर्मविधिः fol. 33*b*; अथ दीपविधिः ib.; अथ शयनविधिः fol. 34*a*; अथ गर्भाधानं fol. 35*a*; अथ जातकर्म fol. 36*a*; अथ नामकरणं fol. 37*a*; अथ पत्नीकुमारोपवेशनं ib.; अथ निष्क्रमणं fol. 37*b*; अथान्नप्राशनं ib.; अथ चौलं ib.; अथ कुमारलक्षणं fol. 38*b*; अथाक्षरस्वीकारविधिः ib.; अथ नक्षत्राणि ib.; अथोपनयनं fol. 39*b*; अथ ब्रह्मचारिनियमः fol. 42*a*; अथोपाकर्म fol. 42*b*; अथोत्सर्जनं fol. 43*a*; अथ समावर्तनं fol. 44*b*; अथ मधुपर्कादिविवाहः fol. 45*a*; अष्टविधा विवाहाः fol. 46*b*; अथ गृहप्रवेशः fol. 49*b*; अथ देवतोत्थापनं fol. 50*a*; अथ प्रतिकूलं ib.; अथ पितरि मृते शुभकर्मनिषेधः fol. 51*a*; अथ विवाहादिषु सूतकोत्पत्तिः fol. 51*b*; °अथ द्वितीयविवाहनिमित्तं fol. 55*b*; अथ विधुरोपासनं fol. 57*a*; अथ मृतभार्यस्य पुनर्विवाहः fol. 57*b*; अथ षोडशसंस्कारकर्माण्याह fol. 59*a*; अथ पादप्रक्षालनविधिः fol. 59*b*; अथ विवाहमासानाह fol. 60*a*; अथ वरगुणाः° कन्यागुणाः fol. 60*b*.

इति° गर्भाधानादिपंचदशप्रकरणं। अथ सप्तमपंचमयोः

सापिंड्यं वक्ष्यते fol. 61*a*: अथ गोत्रनिर्णयः fol. 62*b*; [अथ जामदग्न्यगणः भरद्वाजगणः etc.].

इति॰ गोत्रनिर्णयप्रकरणं । अथ जीवत्पितृव्यकश्राद्धविधिः fol. 68*a*;—अथ नव श्राद्धानि fol. 70*b*;—

इति॰ नानाविधश्राद्धप्रकरणं । अथाशौचप्रकरणं fol. 83*a*.

इति॰ आशौचप्रकरणं। अथ श्राद्धविधिरभिधीयते fol. 90*b*.

इति॰ श्राद्धप्रकरणं । अथ श्राद्धप्रयोगिवचनानि लिख्यंते fol. 97*b*.

इति॰ श्राद्धोपयोगिप्रकरणं। अथ दानविधिरभिधीयते fol. 101*a*; अथ गोदानं, भूदानं, तिलदानं fol. 101*b*, etc.

इति॰ दानप्रकरणं । अथ द्रव्यशुद्धिः fol. 110*b*; भूमिशुद्धिः, गृहशुद्धिः ib.; पात्रशुद्धिः fol. 111*a*; धान्यशुद्धिः fol. 111*b*; अन्नशुद्धिः ib.; जलशुद्धिः fol. 112*b*; वस्त्रशुद्धिः fol. 113*a*; देहशुद्धिः fol. 113*b*.

इति॰ द्रव्यशुद्धिप्रकरणं। अथ प्रायश्चित्तमुच्यते fol. 113*b*; अथोपपातकानि fol. 115*a*; अथ प्रायश्चित्तं fol. 115*b*, etc.

इति॰ प्रायश्चित्तप्रकरणं ॥ पिता पितामहश्चैव जामाता भगिनीत्रयं । श्वशुरेण च संबद्धा सप्तगोत्रा प्रकीर्तिता ॥ अथैकोत्तरशतकुलानि । ॰ fol. 127*b*; अथ धान्यपरिमाणं fol. 129*a*; अथ सुवर्णपरिमाणं fol. 129*b*.

इति॰ अब्दादिलक्षणं । अथ निमेषादिकालनिर्णयमाह । fol. 129*b*; अथ द्वितीया etc.; पूर्णिमा fol. 132*a*; अथ गौरीतृतीया fol. 132*b*; रामनवमी ib.; अक्षयतृतीया fol. 133*a*; नागपंचमी fol. 134*a*; नृसिंहजयंती ib.; जन्माष्टमी fol. 135*a*; गणेशचतुर्थी fol. 136*a*; संकटचतुर्थी fol. 136*b*; ऋषिपंचमी fol. 137*a*; दूर्वाष्टमी ib.; ज्येष्ठाष्टमी fol. 137*b*; श्रवणद्वादशी fol. 138*a*; अनंतचतुर्दशी fol. 138*b*; बृहद्गौरीतृतीया fol. 139*a*; कपिलाषष्ठी ib.

इति॰ चैत्रादिषण्मासतिथिनिर्णयः॥ अथाश्विनप्रतिपन्निर्णीयते fol. 139*a*; इति नवरात्रविधिः । अथ नवमी fol. 141*a*; इति॰ नवरात्रप्रकरणं fol. 142*a*; इति॰ विजयादशमीनिर्णयः । अथ दीपावली fol. 143*a*, etc.

इति॰ संपूर्णतिथिनिर्णयः । अथ स्थालीपाकः fol. 145*b*; अथामावास्यायां fol. 146*a*; अथ प्रत्याब्दिकनिर्णयः fol. 147*a*;—अथ पुण्यतिथयः fol. 150*b*; अथ संक्रांतिः fol. 151*a*; अथ मलमासः fol. 151*b*;॰ अथ तीर्थविधिः fol. 155*a*; अभ्यंगविधिरुच्यते fol. 157*a*.

It ends:

सर्वग्रंथेषु यत्प्रोक्तं सारं सारं समुद्धृतं ।
नारायणेन तत्सर्वं लिखितं हितकारिणा ॥

इति श्रीनारायणभट्टविरचितायां धर्मप्रवृत्तौ स्थालीपाकादिमंगलांतप्रकरणं ॥ समाप्तो ऽयं धर्मप्रवृत्त्याख्यो ग्रंथः ॥ संवत १६५९ वर्षे आषाढवदि १० रवौ लिखितं ॥ दीक्षितजयदवस्य पु॰

Besides *Smṛitikāras* and *Purāṇas*, the following authorities are quoted: *Anantācārya*, foll. 71*b*, 75*a*; *Kārikā*, foll. 9*a*, 15*b*, 18*b*, 20*a*, etc.; *Kālanirṇaya* (*Mādhavīya*), foll. 138*a*, 146*b*; *Kālaviveka*, fol. 145*b*; *Kālādarśa*, foll. 72*b*, 77*a*, 146*b*; *Khilasaṃhitā*, fol. 23*b*; *Candrikā*, fol. 7*a*; *Cintāmaṇi*, fol. 132*a*; *Jyotiḥśāstra*, fol. 41*b*; *Jyotiḥsāgara*, fol. 60*a*; *Jyotiḥsāra*, fol. 40*b*; *Durgārṇava*, fol. 140*b*; *Nibandhasāra*, fol 36*b*; *Purāṇasamuccaya*, fol. 138*a*; *Prayogapārijāta*, foll. 19*b*, 25*a*, 35*b*; *Prayogapārijātasārāvali*, fol. 5*a*; *Prayogasāra*, fol. 79*a*; *Prayogasārāvali*, fol. 41*a*; *Madanapārijāta*, fol. 38*a*; *Mahārṇava*, fol. 20*a*; *Mādhavīya*, fol. 74*a*; *Viśvarūpanibandha*, fol. 139*b*; *Viśvādarśa*, fol. 79*a*; *Vṛittaśata*, fol. 152*a*; *Śiromaṇi*, fol. 40*a*; *Śaunakakārikā*, fol. 14*a*; *Saṃgraha*, foll. 17*b*, 26*a*; *Sāyaṇīya*, fol. 20*a*; *Sūryodayanibandha*, fol. 141*a*; *Smṛiticandrikā*, foll. 30*a*, 50*a*; *Smṛitibhāskara*, fol. 154*b*; *Smṛitisāra*, fol. 72*b*; *Smṛitisārasamuccaya*, foll. 3*b*, 11*b*, 30*a*, etc.; *Smṛityarthasāra*, foll. 2*b*, 4*a*, 8*b*, 9*b*, etc.; *Hemādri*, foll. 49*a*, 62*a*, etc. [GAIKAWAR.]

1561.

2063. Foll. 197; size 11 in. by 5 in.; good, modern Devanāgarī writing; nine lines in a page.

Dharmapravṛitti. [GAIKAWAR.]

1562.

1343. Foll. 103; size 12 in. by 4½ in.; on the whole fairly written, in Devanāgarī, by

three different hands, in 1799 A.D.; 10 or 11 lines in a page.

The same work. [H. T. COLEBROOKE.]

1563.

1663. Foll. 144; size 8 in. by 3½ in.; Devanāgarī character, indifferent handwriting; 11 or 12 lines in a page; the first seven leaves by a different hand from the rest.

Nārāyaṇa Bhaṭṭa's Dharmapravṛitti. Incomplete.

From the beginning of the chapter on *aśauca* (fol. 83*a* in the above analysis) to the end of the *Suvarṇaparimāṇa* (fol. 129*b*, ib.).

This chapter ends on fol. 140*b*. It is followed on foll. 140*b*, 141*b* by a portion of some other work (?), written by the same hand, beginning: स्वयं वा पच्यते पाकः पत्नी वा पच्यते यदि । ° प्रीतिकामस्य लक्षणं । ° अथान्नलक्षणं fol. 140*b*; आमिषलक्षणं fol. 141*a*; and ending समाप्तो ऽयं ग्रंथः ॥ संवत् १८२० शके १६९०. This leaf (141) is marked ध· प्र·

Then follows, on fol. 141*b*, चंडीपाठविधिः। तथा कालिकापुराणे । °

अथ वलिदानं fol. 142, etc. These three leaves (142–144) are marked नि· सि· it being an extract from the second chapter of the *Nirṇayasindhu* (MS. 1888, foll. 63*a*–65*b*), ending: इति शतचंडीसहस्रचंडीवलिदानविधिः ॥ अथ नवरात्रपारणानिर्णय etc., two lines obliterated.

Moreover, the first seven leaves of the volume also do not belong to the *Dharmapravṛitti*, but to some other treatise. This extract begins: अथ संक्षेपतो निर्णयसिंधुपाराशरविज्ञानेश्वरसारभूत आशौचनिर्णयो लिख्यते। तत्र आचतुर्थं गर्भनाशः स्रावः ° इति जननाशौचं fol. 2*a*; अथानुगमने fol. 4*a*; अथ निर्हरणे fol. 4*b*; अथातिक्रांताशौचं fol. 5*a*; अथाशौचसंपातः fol. 6*b*; अथापमृत्यौ fol. 7*b*. The marginal marks of these leaves have been cut out; and the title has been obliterated on fol. 1*a* and supplied by धर्मप्रवृत्ति.

For other MS. of the *Dharmapravṛitti*, see Rāj. Mitra, Bikāner Cat., p. 383; P. Peterson, Rep. II. (1883-4), p. 118.

[H. T. COLEBROOKE.]

1564.

1542a. Fol. 1; size 10½ in. by 5¾ in.; modern Devanāgarī writing; thirteen lines.

The beginning of the *Saṃskāra* section of the [*Sarva-*]*Dharmaprakāśa*, a digest, composed (at Benares) by *Śaṅkara*, son of *Nārāyaṇa* (author of *Tristhalīsetu*) and *Pārvatī*.

It runs as follows:

शुंडादंडविलोडनैरिव मुहुर्दिग्वारयंतं जनं
प्रत्यूहान्महतो निशाकरकरव्रातव्रतं बिभ्रता ।
दंतद्योतितदिङ्मुखेन हसितेनानंदयंतं शिवौ
शांतं तच्छिशुमाश्रये ऽहमनयोः खेलंतमारात्पुरः ॥ १ ॥
संपूज्य प्राङ्मुखः श्रीहरिमुदधिसुतां देवतां चैव वाचं
स्वाविद्यां सूत्रकारान्गुरुमथ सकलान्धर्मशास्त्रप्रवक्तॄन्।
श्रीमन्नारायणाह्वं गुरुमथ जननीं पार्वतीं शंकरः श्री-
मीमांसान्यायसारं शिवपुरि तनुते सर्वधर्मप्रकाशं ॥ २ ॥
मेधातिथेश्चापरार्कविज्ञानेश्वरयोस्तथा ।
स्मृत्यर्थसारकर्तुश्च कालादर्शकृतस्तथा ॥ ३ ॥
चंद्रिकाकारहेमाद्र्योर्माधवश्रीनृसिंहयोः ।
गुरो[श्च] त्रिस्थलीसेतुकर्तुर्ज्ञात्वा मतानि तु ॥ ४ ॥
तद्विरोधे प्रबलता कस्यचिच्चिह कथ्यते ।
क्वचित्क्वचिद्विरोधो ऽपि तैरनुक्तो निरूप्यते ॥ ५ ॥
तच्चाविमृश्य विबुधैर्न दूष्यं
न्यायाननालोच्य तु जैमिनीयान् ।
इंतान्यथा वो बुधता मुधैव
स्यात्क्षीरनीराविदिहंसतेव (!) ॥ ६ ॥

तत्र तावद्धर्मप्रमाणान्याह याज्ञवल्क्यः । श्रुतिः स्मृतिः सदाचारः ° (I. 7) स्मृतं ॥ अत्र सदाचारो होलाकादिरिति यो(?) ऽदृष्टार्थो न तु दृष्टार्थो मातु[ल]कन्यापरिणयो रागेणापि तदनुष्ठानोपपत्ते[:] प्रतिसंकल्पनायोगात् तदिदं शास्त्रदीपिकाप्रकाशे प्रपंचितं । स्वस्य चेति वैकल्पिके विषये यथा गर्भाष्टमे ऽष्टमे वाब्द इति सम्य[क्]संक(ल्पजातः शास्त्राविरुद्धविध्वंसना यत्राप्याचार्यप्राचीनेन प्राचो क्षेत्रजादिपुत्राभावे सपिंडा-)

The last line (from त्यजात:) was apparently supplied by a different hand, and was partly copied from the beginning of the next leaf which belongs to a different work, just to establish a connection therewith.

This fragment is here prefixed to a MS. of the *Viruddhavidhividhvaṃsa*—as if it were the beginning of that work, which had been lost—probably owing to the शास्त्रविरुद्धविध्वंसना occurring therein.

A MS. of the *Saṃskāra-kāṇḍa* of the *Dharmaprakāśa*, beginning with the same stanza as this fragment, is described in Rāj. Mitra's Cat. of Bikāner MSS., p. 382; but the work is there ascribed to *Śiva Sūri;* no author's name being, however, mentioned in the colophon.

As *Kamalākara*, the son of *Śaṅkara's* brother, *Rāmakrishṇa*, wrote his *Nirṇayasindhu* in 1611-12 A.D., the *Sarva-Dharmaprakāśa* was probably composed in the latter part of the 16th century.

For the same author's (*Dharma-*) *Dvaitanirṇaya*, see no. 1575. [H. T. COLEBROOKE.]

1565.

2392. Foll. 99; size 11 in. by 4 in.; fairly written, in Devanāgarī, in the earlier part of the last century; eight lines in a page.

Dharmaviveka, a manual of religious feasts and fasts, by *Viśvakarman*, son of *Dāmodara* and *Hīrā*, and grandson of *Bhīma*.

It begins:

नतोन्नतश्चेतसि चिंतितो यो
जनस्य सर्वत्र च शर्मकर्ता ।
चिकीर्षिते कर्मणि विघ्नहर्ता
स सिद्धिमाधातु गणस्य भर्ता ॥ १ ॥

भीमात्मजः सर्वगुणाभिरामो
दामोदरो विज्ञवरो ऽवतीर्णः ।
तस्यात्मजो यः परमो महीयान्
चिंतामणेर्विज्ञमणेः कनीयान् ॥ २ ॥

हीराभिधाना जननी यदीया
गुणा यदीया जगति प्रसिद्धाः ।
सिद्धांतमद्धा सकलस्मृतीनां
पितुः प्रसिद्धादधिजग्मिवान्यः ॥ ३ ॥

श्रुतिस्मृतिज्ञानविशुद्धबुद्धिना
तदर्थधर्माचरणाप्तशुद्धिना ।
ग्रंथः शुभस्तेन च विश्वकर्मणा
वितन्यते धर्मविवेकसंज्ञः ॥ ४ ॥

कांडाष्टकेन यत्रैव सर्वो धर्मो प्रदर्श्यते ।
धर्मविवेकसंज्ञः स धर्माणामाकरः स्मृतः ॥ ५ ॥

विचारात्ल्पबहुत्वाभ्यां तोषो ऽल्पज्ञबहुज्ञयोः ।
इति तयोः सुखायेह कुर्वे धर्मस्य निर्णयं ॥ ६ ॥

तत्र निर्णयो नाम परस्परविरुद्धार्थप्रतिपादकानां वाक्यानामर्थविशेषे स्थापनं । °

° प्रतिपन्निर्णयो वृत्तो fol. 9*b;* इत्येकभक्ततिथिनिर्णय fol. 11*b;* इति नक्ततिथिनिर्णयः fol. 13*b;* इति नक्तैकभक्तादिकर्मसु तिथिद्वैधे निर्णय उक्तः fol. 15*b;* ° तृतीयानिर्णयो ° । अथ चतुर्थी fol. 23*a;* अथ पंचमी fol. 25*a;* अथ षष्ठी fol. 26*b;* अथ सप्तमी fol. 27*b*, etc.; इति चतुर्दशी । अथ पंचदशी fol. 68*a;* अथ फाल्गुनीहोलिका fol. 72*a;* अथ दीपावली fol. 74*a*, etc.

ग्रंथे धर्मविवेकाख्ये निर्मिते विश्वकर्मणा ।
पंचदश्यां समाप्तायां कालकांडं समाप्तिमत् ॥

इत्थं निर्णीतासु तिथिषु व्रतनिर्णयः । fol. 97*a* (misplaced with fol. 98, between foll. 92 and 93); अतो ऽनुक्रमणी चैषा संस्कृतैरेव बध्यते । तत्रादौ पुरुषार्थनिरूपणं । आचारप्रशंसा । कर्मप्रशंसा ° fol. 98*a*.

It ends: कर्मकालावधिनिरूपणं । साग्निकामावास्यानिर्णय इति ॥ इति श्रीविश्वकर्मविरचिते धर्मविवेके (some letters eaten away) [कां]डं समाप्तं ॥

On the first 25 leaves the following authorities are quoted: *Kālamādhavīya*, foll. 12*a*, 25*a*; *Nirṇayāmṛita*, foll. 9*a*, 24*a*; *Brahmasiddhānta*, fol. 5*a*; *Madanaratna*, fol. 25*b*; *Mādhavanibandha*, fol. 9*b*; *Mārkaṇḍeyavyavasthāpakavacanāt*, fol. 17*b*; *Rudrayāmala*, fol. 9*a*; *Siddhāntaśiromaṇi*, fol. 5*b*; *Hemādri-siddhānta-saṃgrahe*, foll. 15*b*, 17*a*.

For a different work (on *Mīmāṃsā* philosophy) of the same title, see Rāj. Mitra, Notices, V., p. 240.

[H. T. COLEBROOKE.]

1566.

914. Foll. 366; size 13 in. by 4½ in.; clear, modern Devanāgarī writing; eight lines in a page.

Govindārṇava, also called *Smṛitisāgara,* or *Dharmatattvāloka,* a general Digest of religious observances, compiled, under orders of *Govindacandra* (*Govindadeva*) of Kāśī, by his minister *Śesha Nṛisiṃha,* son of *Rāmacandra* (*Rāmabhadra*).

The complete work consists of six sections—viz.: *saṃskāra-, āhnika-, śrāddha-, śuddhi-, kāla-,* and *prāyaścitta-vīci*—of which this MS. contains only the first and the last sections.

I. *Saṃskāra-vīci* (foll. 175), begins:

यन्मायावशतः प्रपंचितवपुश्चित्स्वप्रकाशात्मकं
श्रुत्यातद्व्यतिरेकगम्यपरानंदाद्वितीयात्मकम् ।
स्वाध्यासान्मनसा वृतस्य जगतो ऽसत्यस्य सद्भासकं
भूत्यै तन्निखिलाद्यसंहृतिचणं स्यान्नारसिंहं महः ॥ १ ॥
मूर्तिं तूर्णविदीर्णदैत्यनखरां प्रेक्ष्य प्रकंपां पुरो
लक्ष्मीं मुद्रितलोचनां सचकितं वीक्ष्याशु संहृत्य तत् ।
रूपं सस्मितमीक्षितामरमुखो मायेति विस्मायितां
तामालिंग्य विनोदयंश्चटुशतैर्युष्मान्नृसिंहो ऽवतु ॥ २ ॥ ० ९ ॥

अस्ति स्वस्तिस्थितिरिह चतुर्वर्गसर्गैकभूमिः
स्वर्गंगायास्तटपरिसरे राजधानी शिवस्य ।
यस्यामीशः शमितविषमाशेषकर्मा नाशपाशं
शश्वज्जंतोरुपदिशति तत्तारकं ब्रह्मशांतं ॥ १० ॥ ० २४ ॥

तत्रासीच्छुचिहासः शौर्यैनिवासः कृतेंद्रपरिहासः ।
परिहृतजगदायासो जनितत्रासः परेषु शिवदासः ॥ २५ ॥

[० २७ ॥
तस्मादाविरभूत् प्रभूतविभवो गांगेयमेयोर्जितो
गंगादास इति प्रसिद्धमहिमा गंगां समाराध्य सः ।
स्वामाख्यामकृतार्थयत्कुलमलंचक्रे न्यचक्रेश्वरान्
सक्लेशादजयज्जयैकनिलयः शक्रे ऽप्यवज्ञाकरः ॥ २८ ॥
तदनु दनुजवैरिपादपद्मप्रणतिपरः समभून्महेशदासः ।
इह हरिहरयोरभेदभावं भजनमुपादिशदेष योजनेषु ॥ २९ ॥

[० ३१ ॥
अजनि नयनसिंहः पार्थिवो ऽस्मादकस्मात्
समरभुवि यदीयं सिंहनादं निशम्य ।
परनरपतिमाद्यं तुंगमातंगसंघाः
सपदि विपदि मग्नास्ते दिगंताम्भजंते ॥ ३२ ॥ ० ३३ ॥
तद्वंशे भूवतंसे ऽजनि जननयनानंदचंद्रो नरेंद्रो
माहेंद्रं लोकमेषा हसति वसुमती यं पतिं प्राप्य पुण्यैः ।
श्रीमानुत्सन्नशत्रुः परिचरितसदामाधवो माधवो यं
संप्राप्ताः साधवो ऽमी गुणमणिविपणीर्माधवो धर्मधुर्यः
[॥ ३३ ॥ ०

Thus we have first a succession of four princes: *Śivadāsa,* his son *Gaṅgādāsa,* his son(?) *Maheśadāsa,* and his son *Nayanasiṃha;* and then a descendant of those, *Mādhavadāsa,* whose eldest son, *Govindacandra,* was the patron of the present author; his younger sons being *Kāśirāja* (*Kāśidāsa*) and *Narottama,* all three of whom come in for a plentiful share of praise.

The introduction, consisting of 85 verses, ends thus:

तत्राभूत् सकलकलाकलापकौतूहलावासः ।
श्रीरामभद्रविबुधः परममहापुरुषलक्षणोपेतः ॥ ७६ ॥
तर्के कर्कशतां वहन्नतितरां भाट्टे तथात्युद्भटो
वेदांतेषु पटुस्तथातिनिपुणः सांख्ये ऽपि विख्यातधीः ।
अष्टव्याकरणी प्रबंधचतुरः साहित्यरत्नाकरः
क्षोणीमंडलमंडनैकतिलकः श्रीरामचंद्रो गुरुः ॥ ७७ ॥
तत्तनयः प्रथितनयः कृतविनयः सुष्टु दुष्कृतापनयः ।
अभवद्गुणैकनिलयः श्रीनरसिंहाभिधो विबुधः ॥ ७८ ॥
आचारे चतुराननः श्रुतिवनीसंचारपंचाननः
शश्वद्यश्च षडाननः खलमिलन्मानाद्रिनिर्भेदने ।
नानाशास्त्रवचोविचारणचमत्कारे सहस्राननः [० ८० ॥
केषामेष मनोविनोदमतनोन्नासौ नृसिंहो बुधः ॥ ७९ ॥
तं शेषामलवंशभूषणमणिं गोविंदचंद्रः स्वयं
विद्वन्मंडलपुंडरीकतरणिर्भूमंडलीमंडनं ।
धर्मोद्धारविधौ समाहितमनाः प्रीत्यानुनीयाधुना
गोविंदार्णवनामकं व्यरचयद्धर्मप्रबंधं शुभं ॥ ८१ ॥
अशेषविदुषामेष संतोषाय विशेषतः ।
करोति तदनुज्ञातो नृसिंहः सन्निबंधनं ॥ ८२ ॥ ० ८३ ॥

श्रुतिस्मृतिपुराणानि निबंधान्विविधानपि ।
दृष्ट्वा सम्यक्समासेन सारोद्धाराय मे श्रमः ॥ ८४ ॥
तत्रादौ सुखबोधार्थं ब्रूमः प्रकरणक्रमं ।
संस्कार आह्निकं श्राद्धं शुद्धिः कालश्च निष्कृतिः ।
क्रमात् षड् वीचयो ज्ञेयाः सर्वशास्त्रार्थदीपिकाः ॥ ८५ ॥
निबंधमतभेदेन धर्मतत्वं यदस्फुटं ।
विविच्यते सहृदयप्रीत्यै तत् न्यायलेशतः ॥

इह यद्यपि धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः श्रूयंते सेव्यतया तथापीतरपुरुषार्थत्रयस्य धर्माधीनसिद्धिकत्वेनोपजीव्यत्वादावश्यकत्वात्स एव प्रथमतः सेवनीयः । °

इति° नरसिंहसूरिविरचिते स्मृतिसागरे उपोद्घातप्रकरणं fol. 24*b*.

The *Saṃskāra* ends: इति श्रीमदखंडभूमंडलाधीश्वरसमस्तसाम्राज्यधुरंधरश्रीमद्गोविंददेवादिष्टश्रेष्ठनरसिंहसूरिविरचिते गोविंदार्णवे धर्मतत्त्वालोके संस्कारवीचिः प्रथमः समाप्तः॥

Then follow two leaves containing a list of contents in a different handwriting.

II. *Prāyaścittavīci* (foll. 185), begins:

आनंदायोह्विधीर्मीर्गिरिममरपतित्रस्तगोमंडलस्य
श्रीभर्तुः श्रीनिधानं करनिकरचिरध्वस्तगाढांधकारः ।
उन्मीलन्नीलवक्षस्थलकलितरुचिस्वेदबिंदुप्रपंचे
प्रोद्यच्चारुताराधिपसुभगवपुस्तायतां कौस्तुभो वः॥१॥
नृसिंहचरणांभोजमकरंदमधुव्रतः । [° २ ॥
निरस्तविस्तरं वक्ष्ये प्रायश्चित्तविनिर्णयं ॥ ३ ॥
प्राचीनेषु निबंधेषु प्रमाणैर्यद्व्यवस्थितं ।
तत्र चर्चां समुत्सृज्य सारः संगृह्यते मया ॥ ४ ॥
तत्र प्रायश्चित्तपदार्थमाहांगिराः ॥ °

It ends fol. 185*b*: इति श्रीमन्महाराजाधिराजसाम्राज्यधुरंधरश्रीगोविंददेवादिष्टश्रेष्ठनृसिंहसूरिविरचितः प्रायश्चित्तनिर्णयः समाप्तः ॥

This part also is followed by a list of contents on four leaves.

Of the authorities quoted in the first section may be mentioned:—*Aparāditya*, fol. 59*b*; *Aparārka*, fol. 143*b*; *Kalpataru*, fol. 116*a*; *Kārikānibandha*, fol. 72*a*; *Gṛihyakaumudī*, fol. 77*b*; *Govindarāja*, 13*a*; *Jyotiḥprakāśa*, foll. 73*b*, 125*a*; *Jyotiḥsāgara*, fol. 76*b*; *Jyotiḥsāra*, fol. 79*a*; *Jyotirarṇava*, fol. 118*b*; *Jyotir-Nṛisiṃha*, fol. 119*a*; *Dīpikā*, fol. 79*a*; *Prayogasāra*, fol. 106*b*; *Bhaṭṭa(pādāḥ)*, foll. 15*a*, 16*a*, etc.; *Maheśvara*, foll. 116*a*, 121*b*; *Māṇḍavya*, fol. 73*a*; *Mādhavācārya*, fol. 35*a*; *Mitāksharā*, foll. 56*a*, 60*b*; *Medhātithi*, fol. 72*b*; *Ratnamālā*, foll. 77*a*, 78*a*; *Rājamārtaṇḍa*, foll. 28*a*, 79*a*; *Lalla*, fol. 79*a*; (*Varāha-*) *Saṃhitādīpaka*, fol. 74*b*; *Viśveśvara Bhaṭṭa*, fol. 28*b*, etc.; *Vṛittaśatasaṃgraha*, fol. 117*a*; *Vyavahāroccaya*, foll. 77*a*, 78*a*, 81*b*; *Saṃgraha*, fol. 58*b* (*-kāra*), fol. 68*a*; *Smṛiticandrikā*, fol. 75*a*; *Smṛitibhāskara*, fol. 82*b*; *Smṛitiratnāvalī*, fol. 75*b*; *Smṛityarthasāra*, fol. 81*a*; *Haradattamiśra*, fol. 137*b*; *Hemādri*, fol. 70*b*. [H. T. COLEBROOKE.]

1567.

640. Foll. 125; size 16½ in. by 5 in.; fairly good, modern Bengalī handwriting; eight lines in a page.

Smṛitisaṃgraha(?), or *Vyavasthā-vivecana* (or *-saṃkshepa*), a summary of religious ceremonies enjoined in the *Smṛitis*, by *Rāmabhadra Nyāyālaṃkāra Bhaṭṭācārya*, of Navadvīpa (Nuddea).

It begins: अथ अनध्यायविवेचनं ।

पञ्चदश्यां चतुर्दश्यां अष्टम्यां राहुसूतके ।
धातुसंधिषु भुक्त्वा वा आह्निकं प्रतिगृह्यते ॥

धातुसंधिषु चैत्रश्रावणमार्गशीर्षाणां शुक्लप्रतिपत्सु । इदं तु त्रिधातुसंवत्सराभिप्रायेण एतदतिरिक्तप्रतिपत्सु काम्यत्वमिति । °

अथ अकालवृष्टिव्यवस्था fol. 4*a*; अथ नानासंग्रहकारसंमतं नानाविधं शूद्रकर्तृकतपेणवाक्यं लिख्यते fol. 4*b*.

Fol. 5*a*: प्रायशः संकल्पानामेव कर्मणामारम्भकत्वादादौ स एव निरूप्यते । कायवाङ्मनोभी रचितं कर्मफलाय समर्थमिति श्रुत्या प्रधानानामङ्गत्वमुक्तं । तत्र केन रूपेण तस्याङ्गत्वमित्याह मनसा संकल्पयति वाचा अभिलपति कर्मणा चोपपादयतीति । संकल्पयति अमुककामेन मयेदं कर्तव्यमिति निश्चिनोति । वाचा वाक्येनाभिलपति मनसा निश्चितमर्थं तद्बोधकपदैरभिधत्ते । कर्मणा कायव्यापारेण उपपादयति । यथाविधि समापयतीत्यर्थः । संकल्पयतीत्यादि विध्यर्थे लट् । °

अथ मलमासः fol. 8b, etc.; अथ जन्मतिथिव्यवस्था fol. 14b; अथ प्रतिपत् fol. 16a; अथ द्वितीया fol. 16b, etc.

इति ° व्यवस्थाविवेचने तिथिविवेचनं ॥ अथ श्राद्धं ॥ पात्रालम्भनपूर्वको हविस्त्यागः श्राद्धमिति मैथिलाः। ° fol. 50b.

इति ° श्राद्धव्यवस्था समाप्ता ॥ अथ प्रायश्चित्तव्यवस्था ॥ तत्रादौ प्रायश्चित्तलक्षणं । fol. 78b.

इति ° प्रायश्चित्तविवेचनं समाप्तं॥ अथ शुद्धिव्यवस्थासंक्षेपः। तत्रादौ शुद्धिपदार्थो निरूप्यते । fol. 97b.

इति शुद्धिव्यवस्था ॥ अथोद्वाहनिर्णयः ॥ तत्र सापिण्ड्यं निरूप्यते । सापिण्ड्यं साप्तपौरुषमिति वचनात् fol. 122b.

It ends: शूद्राणां समानगोत्रे समानप्रवरे ऽपि विवाहः। अन्यत्सर्वं ब्राह्मणादिवदिति शुल्कं दत्त्वा वरे मृते कन्या देवाय प्रदातव्या । एतच्च कन्यानुमतौ वाग्दत्ताया अपि कन्याकुमारीवद्विवाहः ॥

इति महामहोपाध्यायनवद्वीपनिवासिश्रीरामभद्रन्यायालङ्कारभट्टाचार्यैर्विरचिता उद्वाहव्यवस्था समाप्ता ॥ The same colophon, mutatis mutandis, occurs at the end of the first three chapters.

Foll. 1a, 50a, 79a, 98a contain tables of contents for the respective portions they precede.

The title given to the work on the last page by Colebrooke's Paṇḍit is रामभद्रन्यायालंकारकृतः स्मृतिसंग्रहः ॥ [H. T. Colebrooke.]

1568.

743. Foll. 98; size 12¾ in. by 6 in.; fairly good, modern Bengalī handwriting; ten lines in a page.

The same work. The sections on *tithi* (incomplete at the beginning ?) and *śuddhi*.

It begins: प्रायशः संकल्पानामेव कर्मणामारम्भकालादादौ स एव निरूप्यते। ° see fol. 5a in preceding MS.

The *tithivyavasthā* ends fol. 53a. Between this and the beginning of the *śuddhivyavasthāsaṃkshepa*, fol. 55b, this MS. (as well as the next one) contains brief sections on *bhūmidāna*, fol. 53a, and *suvarṇadāna*, fol. 54b. Neither this MS., nor the next one, makes any mention of the author to whom the work is ascribed in the preceding MS.

It ends with eight *ślokas* from the *Sanatkumārasaṃhitā* (on *vṛihad-āmānnadāna*, of which MS. 640 has only the first 6½ at the end of the *śuddhi*) ending: पौर्णमास्यां प्रोष्ठपद्यां स याति परमं पदं ॥ समाप्तोयं ग्रन्थः ॥

Colebrooke's Paṇḍit has given it the title (fol. 1a): छाँचकाटा (!) स्मृतिसंग्रहपूर्वखंडं ।

[H. T. Colebrooke.]

1569.

638a. Foll. 44; size 16 in. by 5 in.; fair, modern Bengalī handwriting; eight lines in a page.

The *Tithivyavasthā* of the same work.

It begins, as the preceding MS.: प्रायशः संकल्पानामेव °

It concludes with the section on *suvarṇadāna* mentioned above, ending: तथा च ब्राह्मे ।

सर्वदानानि नियमा आयामाश्च तपांसि च ।
यज्ञो दानं तथा जप्यं श्राद्धं च सुरपूजनं ।
गङ्गायां तु कृतं सर्वं कोटिकोटिगुणं भवेदिति ॥

after which the colophon, by a different hand: इति श्रीराप[च]भट्टकृतव्यवस्थार्णवः समाप्तः ॥ and on the back of the last leaf the MS. has been named accordingly. [H. T. Colebrooke.]

1570.

263. Foll. 75; size 11½ in. by 6 in.; fairly written, in the Bengalī character, by two different hands; European paper; 9 or 10 lines in a page.

Dharmadīpikā, or *Smṛitipradīpikā*, a treatise on controverted points of sacred law, by *Candraśekhara Vācaspati*.

Incomplete. The present portion of the work deals mainly with points of the *Vedic* ceremonial.

It begins:

नत्वा शिवपदद्वन्द्वं तातत्रातसेवितं ।
तत्प्रभावद्धितास्माभिः क्रियते धर्मदीपिका ॥
विद्याभूषणविख्यातः षड्दर्शनमते सुधीः ।
तत्सुतस्तादृशो धीमांस्ततो ऽधीती च तत्सुतः ॥
श्रीचन्द्रशेखरो नाम्ना ख्यातो वाचस्पतिः स्मृतौ ।
स्मृतीनां च प्रकाशार्थं तनोतीमां प्रदीपिकां ॥

तत्र मीमांसातर्क एव वेदतन्मूलशास्त्रार्थप्रकाशकः । तथा च भट्टः । मीमांसासंज्ञकस्तर्कः सर्ववेदसमुद्भवः । सर्वेषां वेदानां समुद्भवः प्रकाशो यस्मादिति विग्रहः । सा च मीमांसा द्विविधा कर्मब्रह्मनिरूपकभेदेन जैमिनिबादरायणिप्रणीता कर्मनिरूपिकैव धर्मप्रतिपादिका यतो धर्मजिज्ञासानन्तरमारभ्यमाणं मीमांसाशास्त्रं धर्मप्रतिपादनप्रयोजनकं । अत एवोक्तं भट्टैः । धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनं । ०

अथात्र कर्मभेदप्रतिपादसूत्रं fol. 9a; अथ विधिभेदाः fol. 10b; अथाधिकरणनिरुक्तिः fol. 17a; अथ श्रुतिलिङ्गादिनिरूपणं fol. 17b; अथ ग्रहाधिकरणं fol. 22b; अथ दर्वीहोमाधिकरणं fol. 25b; अथ कपालाधिकरणं fol. 26b; अथ सर्वदृष्टाधिकरणं fol. 27b, etc.

It ends: अथ सोमीयवेदिविधिन्यायः ॥

For a fragment of this work, see Rāj. Mitra, Notices, II., p. 77. [H. T. Colebrooke.]

1571.

251a. Foll. 31; size 12½ in. by 4½ in.; good, modern Bengalī handwriting; ten lines in a page.

Vyavasthāsārasaṃgraha, a compendium of religious (*smārta*) rites, by *Rāmagovinda Cakravartin* (son of *Mukunda*). Incomplete.

It begins:

पादपद्मयुगमाद्यं शाम्भवं संस्मरन् लिखति पुस्तिकामिमां।
श्रीमुकुन्दबटुरेतदात्मनः कल्मषं भवतु भूरिहारिणः ॥
गुरोः पादयुगं नत्वा रामगोविन्दशर्मणा ।
क्रियते बालबोधाय व्यवस्थासारसंग्रहः ॥

तत्रादौ तिथिव्यवस्था निरूप्यते । तिथिस्तु चन्द्रक्रियोपलक्षितः कालविशेषः । तदेव चान्द्रमसं दिनं । तत्त्रिंशता चान्द्रो मासः । स च द्विविधः । मुख्यो गौणश्च । तत्र मीनस्थरवौ यत् शुक्लप्रतिपदारम्भस्तदादिदर्शान्तो मुख्यचान्द्रश्चैत्रो मासः । ०

Fol. 22a: इति रामगोविन्दशर्मकृते व्यवस्थासारसंग्रहे तिथिव्यवस्था संपूर्णा इति ॥

श्रीकृष्णचरणाम्भोजं नत्वा संक्रमणे रवेः ।
वक्ति श्रीरामगोविन्दो व्यवस्थां धीरसंमतां ॥

तत्रादौ संक्रान्तीनां सङ्क्षोच्यते (l. संग्रह उ०) । ०

Fol. 25b: इति व्यवस्थासारसंग्रहे संक्रान्तिव्यवस्था समाप्ता ॥ अथाद्भुतं ।

इत्यद्भुतशान्तिः fol. 26b.

Fol. 28a: इति ० संबन्धव्यवस्था समाप्ता ॥

नत्वा कृष्णपदद्वन्द्वं संसारजलधिप्लवं ।
वक्ति श्रीरामगोविन्दो व्यवस्थामौर्ध्वदेहिकीं ॥

अथान्त्येष्ट्यादिषोडशश्राद्धाधिकारिणः ०

For a complete MS. (omitting the first introductory *śloka*) and an analysis of the contents of the work, see Rāj. Mitra, Notices, IV., p. 290. [H. T. Colebrooke.]

1572.

41b. Foll. 100; 4to; size 10½ in. by 8 in.; written in the Bengalī character; European paper (watermark 1805); 11–18 lines in a page.

Dvaitanirṇaya, a review of doubtful points of sacred law, composed by *Vācaspati Miśra*, for *Jayā*, wife of King *Bhairava* and mother of *Purushottama Deva*.

It begins: आभीरदारकमुदञ्चित ० cf. Aufrecht, Cat. Bodl., no. 648; Rāj. Mitra, Notices, I., p. 149; V., 296.

It ends: इति द्वैतनिर्णये सिद्धान्तपरिच्छेदः ॥ शाके १७२५ ॥

Foll. 99b and 100a contain a list of contents (*pattrapañjī*).

Regarding the author's probable age see above, no. 1398. [H. T. Colebrooke.]

1573.

253. Foll. 56; size 11½ in. by 5 in.; indifferent Bengalī handwriting of about 1750 A.D.; 8–15 lines in a page.

Dvaitanirṇayapradīpa, or *Kādambarī*, a commentary on the preceding treatise, by *Gokulanātha*.

It begins:

देहस्यामेष निहतो द्वैतनिर्णयवेश्मनः ।
प्रदीपस्तिमिरं हन्तु जीर्णोद्धाराजिरोदरे ॥

नामद्वैतेति। अत्र देवराजादिशरीरवृत्तिरेकदा ऽनेका वृत्तिर्या देवराजत्वादिजातिस्तदवच्छिन्ने शरीरे तादृशशरीरविशिष्टात्मनि वा देवराजादिपदानामस्ति वृत्तिः सा च गृह्यविहितप्रकारोपपन्नपित्रादिसंज्ञिताभिव्यंग्यो भगवत्सङ्केत एव सन्नपदार्थातिरिक्तः स्वाभाविको वा शब्दार्थसंबन्धः °

इति कादम्बरीप्रदीपनामद्वैतनिर्णयविवरणे नामद्वैतनिर्णयः परिपूर्णः fol. 8*a* (8*b* left blank); °दानद्वैतनिर्णयः fol. 18*b*; °महादानद्वैतनिर्णयः fol. 31*b*; °जलाशयद्वैतनिर्णयः fol. 45*b*; °सदाचारद्वैतनिर्णयविवरणं ॥ उपनयनकालनिर्णये° foll. 52*b*, 53*a*.

Col.: इति महामहोपाध्यायश्रीगोकुलनाथप्रणीतः संपूर्णो द्वैतनिर्णयप्रदीपः ॥ श्रीतीर्थदत्तस्याक्षरमिदम् ॥

The MS. seems to contain only a portion of the entire work. Moreover, the different chapters are merely bound together, each being written by a different hand (or sometimes two hands) from the preceding one, and ending at the bottom of the page.

Rāj. Mitra, Notices, V., pp. 166, 281, gives a *Dvaitanirṇaya-jīrṇoddhāra* (or *prakāśa*) by *Madhusūdana Ṭhakkura*, described as a commentary on *Vācaspati Miśra's* work on the dualistic theory of the Supreme and the human souls. [H. T. COLEBROOKE.]

1574.

299. Foll. 91; size 14 in. by 5½ in.; indifferent Bengalī handwriting of 1807 A.D. (by one *Nārāyaṇa Datta Śarman*); worm-eaten, but mostly in the margin; 12–16 lines in a page.

Dvaitapariśishṭa, a treatise, in two chapters, on points of Hindu law, not treated by former writers; by *Keśava Miśra*.

I. begins: स्वामिन्वासो ममैतन्न °; II. (fol. 57), तातस्ते मकरालयः ° see Aufrecht, no. 650.

The leaves of the second chapter are paged separately 6–40.

A much larger work of the same title, and by the same author (of which this is perhaps a fraction) is described by Rāj. Mitra, Notices, V., p. 186. [H. T. COLEBROOKE.]

1575.

1395b. Foll. 48; size 12½ in. by 4½ in.; legibly written, in Devanāgarī, at the beginning of the present century; ten lines in a page.

Dvaitanirṇaya-siddhāntasaṃgraha, a treatise on controverted points in the performance of certain rites, by *Bhaṭṭa Bhānu*, son of the *Mīmāṃsaka Bhaṭṭa Nīlakaṇṭha*; the work being an abridgment of the *Dharma-Dvaitanirṇaya*, by *Bhānu's* grandfather, *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nārāyaṇa*.

It begins:

लक्ष्मीं नारायणं नत्वा सीतया सहितं रघुं ।
गंगायुतं नीलकंठं गुरोः पादांबुजं तथा ॥ १ ॥
पितामहकृतद्वैतनिर्णयार्थस्य संग्रहः ।
नीलकंठात्मजेनेह क्रियते भानुनाधुना ॥ २ ॥

तत्रादौ नवरात्रसिद्धांतः। नवरात्रव्रते च देवीपूजनं प्रधानं।°

इति °नवरात्रनिर्णयः fol. 4*a*; °नवरात्रपारणा fol. 5*a*; इति चतुर्थी fol. 5*b*; °पञ्चमी fol. 6*a*; °जन्माष्टमी fol. 8*b*; °एकादशीवेधे ऽरुणोदयनिर्माणनिर्णयः fol. 9*b*; °चतुर्दशी fol. 11*a*; °शिवरात्रिः fol. 11*b*; °सावित्रीव्रतं fol. 12*a*; °उपाकर्म fol. 15*a*; °होलिका fol. 16*a*; °संक्रांतिनिर्णयः fol. 17*a*; °ग्रहणोपवासः fol. 17*b*; °अनूढकन्यामृताशौचं fol. 18*a*; °संनिपाताशौचं fol. 20*b*; °दत्तकाशौचं fol. 21*a*; °स्त्रीजनने कर्मानधिकारावधिनिर्णयः fol. 23*a*; °क्रियाधिकार° fol. 24*b*; श्राद्धाधिकारनिर्णयः fol. 27*a*; °सपिंडीकरणाधिकार° fol. 30*b*; °पिंडपितृयज्ञप्राशन° fol. 32*b*; °; °आधानाद्यधिकार° fol. 37*a*; °अपत्नीकाधान° fol. 37*b*;

॰ अपुत्रकविधिः fol. 39*a*; ॰ तीर्थयात्रा॰ fol. 40*b*; ॰ ब्राह्मणस्य मांसनिषेध॰ fol. 43*a*; ॰ दत्ताप्रदान॰ fol. 43*b*; ॰ स्तेयान्यमहापातकप्रायश्चित्तनिर्णयः fol. 46*a*.

Colophon: इति श्रीमन्मीमांसकभट्टनीलकंठात्मजभट्टभानुकृते द्वैतनिर्णयसिद्धांतसंग्रहे कोटिलक्षायुतहोमनिर्णयः समाप्तः ॥

The author's brother, *Bhaṭṭa Śaṅkara*, wrote his *Kuṇḍoddyotadarśana* in 1671 A.D.

For another MS. of the work see Rāj. Mitra, Notices, II., p. 271.

[H. T. COLEBROOKE.]

1576.

1258a. Foll. 106; size 9 in. by $3\frac{1}{2}$ in.; indifferent Devanāgarī character; 9 or 10 lines in a page.

The same work, incomplete in the middle; with a fragment of *Bhaṭṭa Śaṅkara's* work, of which the former is an abridgment.

The MS. consists of two portions, paged separately, the first of which consists of 33, the second of 73 leaves.

I. Foll. 1–33 *Bhānu's* treatise from the beginning to the middle of the *anūḍhakanyāmṛitā-vāsanca*, where the MS. breaks off abruptly.

II. From fol. 17*a* (near the bottom) of the second portion to the end, numbered 17–73, contain the concluding portion of *Bhānu's* work from shortly after the beginning of the *kriyādhikāranirṇaya*.

Dated: संवत्सरे १७७३ पौषकृष्णचतुर्थ्यां लिखितं लेखापितं मिठेंनझोरमिश्रात्मजलालचंद्रशर्मणा सारस्वतेन वाराणस्यां श्रीपशुपतिप्रसादादिति ॥

III. Foll. 1–17*a* of the second portion (the first sixteen leaves of which are not numbered) contain a fragment of the *Dharma-Dvaitanirṇaya*, by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nārāyaṇa*.

It begins: संपूर्णैर्गुणं । ॰

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीमद्भट्टनारायणसुतभट्टशंकरकृते धर्मद्वैतनिर्णये पंचमीविषयसंशयोद्भेदपरिच्छेदः ॥ अथ कृष्णजन्माष्टमीव्रतं निर्णीयते ॥ fol. 2*b*; ॰ निर्णये श्रीमद्दाक्षिणात्यसकलशिष्टधुरंधरसंप्रदायोद्दीपकः कृष्णजन्माष्टमीसंशयोद्भेदपरिच्छेदः fol. 10*b*; ॰ निर्णये कृष्णजन्माष्टमीपारणसंशयोद्भेदपरिच्छेदः ॥ एकादीवेध॰ fol. 15*b*.

[H. T. COLEBROOKE.]

1577.

1542. Foll. 153 (the original pagination of which, 142–295, has been obliterated and changed for a fresh one, 2–154); size $10\frac{1}{2}$ in. by $5\frac{3}{4}$ in.; very well written, in Devanāgarī; fourteen lines in a page.

Viruddhavidhividhvaṃsa, a general review of disputed points of (sacred) law, composed, at Aṇahillapāṭaka, by *Lakshmīdhara*, son of *Malladeva* and *Śrī Devī*, grandson of *Vāmana* (brother of *Skanda*), and great-grandson of *Soḍha* (who, like his sons, was minister to King *Someśvara* of Śākambharī).

Incomplete at the beginning. The work consists of seven chapters (*adhikaraṇa*), the first four of which are wanting; a line and a half scored out at the beginning (of fol. 2) of the MS. having contained the colophon of the fourth chapter, and the first few words of the fifth.

Ch. five began orig. यच्चाप्याचार्यप्राची - - (some 16 aksharas) भ्रात्रादयः श्राद्धादिकारिण इति । तत्रापि पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्याविति गोतमवचनमुदाहृतं । ॰

Fol. 17*a*: इति स्मार्त्तमहत्तश्रीमल्लक्ष्मीधरविरचिते विरुद्धविधिविध्वंसे वाक्यमीमांसायां क्षेत्रजादिपुत्राणामेवाभावे भ्रात्रादिश्राद्धादिनिराकरणं नामाधिकरणं[पंचम obliterated]मिति ॥ तदेवं विश्वरूपप्रोक्तं ॰

Fol. 70*a*: इति॰ वाक्यमीमांसायां सिद्धांताख्यमधिकरणं [षष्ठं] समाप्तं ॥ अथ श्राद्धस्य प्रकारात् लक्षणानि प्रोच्यंते । तत्र विश्वामित्रः । ॰

It ends: व्रजत्यश्वमेधफलं पुरुष इति बोधायनसूत्रं ॥ इति स्मार्त° श्राद्धप्रकाराख्यमधिकरणं सप्तमं ॥

ब्राह्मणा ब्राह्मणा जाता जाता ये गुणसागराः ।
नागरा नागराजाहेहारो यानर्हयद्वरः (! or जर्हेहारे-
योनर्ह°) ॥ १ ॥

तदन्वये ऽष्टगोत्राणामष्टगोत्रोन्नतिश्रितां ।
मध्याद्गोत्रेशसंशुद्धे गोत्रे ऽजायत काश्यपे ॥ २ ॥

श्रीमदानंदनगरस्थाने स्थानेश्वराभिधः ।
पंडितो यः स्वविद्याभिश्चतुर्दिग्विदुषो ऽजयत् ॥ ३ ॥

श्रीमदानंदनगरे नागरेभ्यो गृहांश्च यः ।
सप्तविंशतिविप्रेभ्यः प्रददौ सपरिच्छदान् ॥ ४ ॥

षण्मुखः षट्सु तर्केषु चतुर्वेदी चतुर्मुखः ।
मीमांसामांसलप्रज्ञो यो ऽभूत्तस्यान्वये ऽभवत् ॥ ५ ॥

स्कंद स्कंदपितुः प्रज्ञानंदकंदस्त्वमंदधीः ।
शाकंभरीशितुः सोमेश्वरदेवस्य भूभृतः ॥ ६ ॥

सांधिविग्रहिकामात्यो ऽरात्यौघकरिकेसरी ।
सोढस्तस्य सुतो ऽसोढः शत्रुभिस्तत्पदे ऽभवत् ॥ ७ ॥

तस्य पुत्रावभूतां द्वौ भूतांतभूतकीर्तितौ ।
स्कंदवामननाम्ना तावाम्नाताववनीमतौ ॥ ८ ॥

सर्वामात्यपदं ताभ्यां पृथ्वीराजो ऽददन्मुदा ।
सेनाधिपत्यं स्कंदाय प्रदाय च सुखी स्थितः ॥ ९ ॥

सेनापतित्वं स्कंदाय प्रदाय धृतशक्तये ।
महादेवसुतायातिदृग्रूपो भूपवत् (!) ॥ १० ॥

सांधिविग्रहिकाद्यं तु पदं संपाद्य वामने ।
स्कंदो राजे ऽर्पितानंदो ऽवधीन्नित्यं कुरुष्ककान्
[(l. तुरु°) ॥ ११ ॥

सदा स दानानि ददौ द्विजेभ्यो दंडनायकः ।
या काप्यपरिणीतायात् तस्य[ा] वैवाहिकं त्वदात् ॥१२॥

स्कंद स्कंदेति वर्णेषु वर्ण्यमाने ऽत्र नागरः ।
ब्राह्मणं कोपि कोपेन कंपिताधरमुक्तवान् ॥ १३ ॥

स्कंद स्कंदेति वदथ किं विप्राः प्रतिवासरं ।
मदीयहृदये नायमप्यर्द्धस्कंदखंडिका ॥ १४ ॥

इत्येते नागराः प्रोचुर्यत्त्वं यात्वा तदंतिके ।
वद द्विजैवं वचनं यद्यस्ति तव योग्यता ॥ १५ ॥

कोपात्स पादलक्षे द्वादशे शाकंभरीं पुरीं ।
प्राप्य विप्रो राजकुलाद्ययांतं (!) दंडनायकं॥१६॥°२२॥

गते ऽन्यसंगरे स्कंदे निद्राव्यसनसन्नधीः ।
व्यापादितस्तुरुष्कैः स राजा जीवन्मृतो युधि ॥ २३ ॥

हरिराजमथो राज्ये शाकंभर्यां निवेश्य सः ।
स्कंदस्तत्र कियत्कालं स्थित्वा तुर्याश्रमं श्रितः ॥ २४ ॥

द्रम्माणां लक्षविंशत्या विंशत्यश्व(l.°त्या च) शतैः समं ।
वामनः सकुटुंबो (ऽ)णहिल्लपाटकमाट तु ॥ २५ ॥

मल्लदेवो ऽभवत्तस्य पुत्रः पुत्रवतां वरः ।
सुभाषितावलीकर्ता भर्ता भूतलवर्तिनां ॥ २६ ॥

सहस्रसंख्यासाहित्ये लक्ष्यलक्षणसंख्यया ।
कौटिल्याद्यर्थशास्त्रेषु कोटिशो यन्मतिर्मता ॥ २७ ॥

स श्रीदेवीति नाम्नात्मनाम्नातां परिणीतवान् ।
लक्ष्मीशवत्ततो लक्ष्मीधरो ऽभूद्वरधीधरः ॥ २८ ॥

भगवद्बोधभारत्याख्यश्रीपादप्रसादतः ।
आसादितसदानंदाद्वैतज्ञानानुभावकः ॥ २९ ॥

श्रीमति श्रीशवदणहिल्लपाटकपत्तने ।
मल्लदेवः सहामात्यसभ्यः स्मृत्यादिनिर्णये ॥ ३० ॥

वेदांतस्मृतिसिद्धांतश्रांतः स्वांतः(? l. क्रांतः) कवेः पथि ।
पांथो ऽप्रतिमरामाख्यं महाकाव्यं चकार यः ॥ ३१ ॥

प्रत्यक्षीभूतभारत्येवितः (!) स्मार्तमहत्तमः ।
विरुद्धविधिविध्वंसं व्यवधान्मुग्धबुद्धये ॥ ३२ ॥

इति स्मार्तमहत्तमश्रीमल्लक्ष्मीधरविरचिते विरुद्धविधिविध्वंसाभिधानो ग्रंथः समाप्तः ॥ संवत् १५८२ वर्षे चैत्रशुदि ४ भृगौ ॥

At the end of the volume, a leaf has been added, containing a prose paraphrase of the above genealogical account, written by a recent hand:

नागरा ब्राह्मणाः अष्टगोत्राः तेषां मध्ये काश्यपगोत्रे नागरवंशे काश्यां स्थानेश्वरनामा पंडितः चतुर्दिक्षु पंडितान् जित्वा । सप्तविंशतिसंख्यकनागरब्राह्मणेभ्यः सपरिच्छदान्गृहान्ददौ । ° । तदन्वये स्कन्दः ° । शाकंभरीदेशाधिपसोमेश्वरनाम्नो राज्ञः सान्धिविग्रहिकामात्यो जातः । तस्य पुत्रः सोढः सो ऽप्यमात्यः । तस्य पुत्रौ द्वौ स्कन्दवामननामानौ । तद्देशीयराजा पृथ्वीराजनामा स्कंदाय सेनाधिपत्यं वामनाय सान्धिविग्रहिकामात्यं च दत्त्वा स राजा स्वस्थो जातः । ततः स्कंदः तुरुष्ककान् अवधीत् । ततः अन्यसंगरे गते स्कन्दे राजा निद्राव्यसनमंदधीः स तुरुष्ककैर्व्यापादितः । पुनर्हरिराजनामानं शाकंभर्यां संस्थाप्य स्कन्दः चतुर्थाश्रममाश्रितः । वामनस्तु विंशशताधिकविंशल्लक्षद्रव्यैः सह अणहिल्लपाटकमगात् । तत्पुत्रो मल्लदेवः येन सुभाषितावली कृताप्रति[म]रामाख्यं काव्यं च । शास्त्रे कोटिशो मतं यस्य । तेन श्रीदेवी विवाहिता । तस्यां तत्सुतो लक्ष्मीधरो ऽभूत् । स एव भगवद्बोधभारतीशिष्यः अद्वैतज्ञानानुभावकः स एव विरुद्धविधिविध्वंसनामानं ग्रंथमकरोत् स एवायं ग्रंथः ॥

For fol. 1 of the MS., containing a fragment of *Śaṅkara's* (*Sarva-*)*Dharmaprakāśa,* see above, no. 1564. [H. T. COLEBROOKE.]

1578.

1531. Foll. 202 (numbered 1–200, nos. 5 and 35 occurring twice); size 10¼ in. by 4½ in.; indifferent Devanāgarī handwriting of about 1800 A.D.; 14–16 lines in a page.

Prayogatattva, a manual of ordinary religious rites, compiled, at Benares, by *Raghunāthasūri,* son of *Bhānuji,* in Śaka 1577 (A.D. 1655).

It begins:

> शक्यं यत्र विशेषतो निगदितुं ब्रह्मादिवृंदारकैः
> स्वांतध्वांतनिवारणाय सततं संभावितं योगिभिः ।
> ध्यातं मंदरसंस्थितेन जगतः संसारबंधच्छिदा
> पूर्णानंदसमोदनं तदखिलाधारं महो मन्महे ॥ १ ॥
> नैजप्रभापटलनिर्मितकोटिपीठं
> लेखेंद्रवंदितमहोज्वलपादकंजं ।
> प्रालेयशैललसदुंदुरपत्रजातं
> वंदे स्फुरत्त्रिपथगांचितचारुमौलिं ॥ २ ॥
> अहिनरसुरवारानंददात्री मृडानी
> हृतमुनिकुलविघ्ना भक्तवृंदात्तदोषा ।
> दलितदितिजपुंजा शर्वराज्ञी सदा मां
> सुखयतु जगदंबा चंद्रभिन्नावतंसा ॥ ३ ॥
> शारदां शरदिंदुसप्रभां श्वेतनीरजसंस्थितां परां ।
> हंसवाहनसंस्तुतां सदा भावये निखिलार्थदां शिवां ॥ ४ ॥
> स्मृतिप्रणेतृनथ सूत्रकर्तॄ-
> स्तथापरान् भाष्यकृतो ऽभिपूज्य ।
> प्रयोगसंदर्भकृतो ऽपि नत्वा
> प्रयोगतत्त्वं चरिकर्मि काश्यां ॥ ५ ॥

संक्रियते ऽभिः श्रौतस्मार्तकर्मभिः पुरुष इति संस्काराः । ते च चत्वारिंशदित्याहतुः सुमंतुगौतमौ । गर्भाधानानवलोभनपुंसवनसीमंतोन्नयनबलिजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलोपनयनमहानाम्न्यादिव्रतचतुष्टयसमावर्तनपाणिपीडनदेव-पितृमनुष्यभूतब्रह्मसंज्ञकपंचयज्ञानुष्ठानानि तथा पाकयज्ञसंस्था अग्न्याधेयमष्टकाः पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति सप्त हविर्यज्ञसंस्थाः । अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधसौत्रामणीति संज्ञास्तथा सप्तसोमसंस्थाः । अग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्याम इति संज्ञा इत्येते चत्वारिंशत्संस्काराः ॥ तथा दया क्षांतिरनसूयाशौचमनायासो मांगल्यमकार्पण्यमस्पृहेत्यष्टावात्मगुणाः । अन्ये ऽपि तीर्थस्नानादयः संस्काराः । °

इति ° संस्काराख्यं प्रथमं तत्त्वं fol. 3*b*; इति ° परिभाषाख्यं द्वितीयं ° fol. 10*b*; ° स्वस्तिवाचनाख्यं तृतीयं ° fol. 15*a*; आभ्युदयिकाख्यं चतुर्थं तत्त्वं fol. 27*a*;—° ग्रहमखाख्यं पंचमं तत्त्वं fol. 62*a*; ° रजस्वलाशांत्याख्यं षष्ठं fol. 77*a*, etc.

The last two leaves contain a table of contents.

The MS. ends: इति रघुनाथसूरिविरचिते प्रयोगतत्त्वे ऽकैविवाहाख्यं पंचविंशं तत्त्वं ॥ ° ॥

> शांडिल्यान्वयसंभूतरघुनाथेन धीमता ।
> प्रयोगतत्त्वमरचि मुदे ऽस्तु तज्जगत्पतेः ॥ ५ ॥
> शाके वाजिनगेषुभूपरिमिते तैषे सिते ज्ञेकभे
> श्रीमत्पर्वतनंदिनीपरिवृढप्राणप्रियस्यौकसि । °
> श्रीमद्भानजिसूनुना (!) विरचितं सत्पादकंजालिना
> पर्णाजानिमुदे भवत्वविरतं यच्छ्रेयसां साधनं ॥ ६ ॥

इति रघुनाथसूरिविरचितं प्रयोगतत्त्वं समाप्तं ॥

For another MS. of this work, which omits the first four introductory stanzas, see Rāj. Mitra, Cat. of Bikāner MSS., no. 952.

[H. T. COLEBROOKE.]

1579.

1430. Foll. 155; size 12¼ in. by 4½ in.; carelessly written, in Devanāgarī, by two different hands, in 1798 A.D.; ten lines in a page.

Nirṇayāmṛita, a work, in four chapters, on the times and seasons suitable for certain ceremonies, compiled—by order of *Sūryasena-nṛipati* of Ekacakrapura on the Yamunā—by *Allāḍanāthasūri,* son of *Paṇḍita Siddha-Lakshmaṇa.* It begins*:

> कारणमेकं जगतां वारणमास्येन तारणं विपदां ।
> किमपि महो महनीयं प्रत्यूहव्यूहदारणं वंदे ॥ १ ॥

* These extracts were made long before the appearance of Prof. Bhandarkar's Report for 1883-4 (1887), in which this introduction is given more fully. The readings of the present MS. may still be of some value to Indianists.

भावयामि दृढभक्तिभावनीं भाविताङ्घ्रियुगलां सुमंगलां ।
इष्टदां सततमिष्टदेवतां मंत्रवत्सकलमंत्रमातरं ॥ २ ॥ ०

यैः कृतः स्मृतिमहार्णवपार-
प्राप्तिहेतुरिह संग्रहसेतुः ।
तान्नमामि मनुविष्णुयमाद्यान्
कालनिर्णयकृतो ऽप्यहमन्यान् ॥ ४ ॥ ०

जयंति भूमाविह बाहुबाणाः (? l. चा०)
क्षितीश्वरा दिक्श्रुतबाहुबाणाः ।
प्रकुर्वते ये विशदा यशोभिर्
जगत्समग्रं च सदायशोभिः ॥ ६ ॥

बभूव यश्च त्रिदशैः सरूपस्
तदन्ववाये बलवान्सरूपः ।
चकार नित्यं च समाहितानां
परिश्रयं यः परमाहितानां ॥ ७ ॥

तस्मात्म[जन्मा]जनि कर्णदेवस्
त्यागेन यो विश्रुतकर्णदेवः ।
वपुःश्रिया निर्जितकामदेवः
सदा समाराधितवासुदेवः ॥ ८ ॥

तदात्मभूरुद्धरणो (णः Bh.) क्षितींद्रः
क्षितींद्रभिन्नानुमहानुभावः ।
शुभावदातायतकीर्तिरार्ति-
हरः सतां श्रीपतिमूर्तिरासीत् ॥ ९* ॥

स्वकीर्तिवल्लीप्रभवातिवल्ली-
स्थलीव ढिल्ली नगरीमतल्ली
शतप्रफुल्ला विकसद्विलासा
सुकीर्तिनीरैः समसिंचि येन ॥ १०* ॥

प्रस[क्तमु]क्तामयहेम० ११ ॥

उद्धरणं शुद्धरणं संहरणं विद्विषां समुद्धरणं ।
सुहृदां पुरातनहृदां नमतितम (मां Bh.) को न नाम
[तसुमाना (! तमनामः Bh.) ॥ १२ ॥

सौंदर्येण विजृंभिणा रति[पति]ः शौर्येण श्रीपतिः
गांभीर्येण सरित्पतिर्विलसता धैर्येण भूभृत्पतिः ।
संक्रांत्योडु(l. डु)पतिः श्रिया धनपतिर्यस्तेजसाहर्पतिस्
तेनार्योद्धरणेश्वरेण सुमतिः स्पर्धेत कः क्ष्मापतिः ॥ १३† ॥

---

* Bh. gives verses 9 and 10 in the order 9*a*, 10*a*; (10*b*), 9*b*. His reading of our 10*b* is:

भल्लीशतप्रोतशकेशकुंभीकुंभास्रनीरैः समसिं(से)चि येन ।

† The MS. numbers both half-verses (13 and 14); hence the next verse 15, etc.

अस्य(? l. स्या)वसावाहितसत्प्रतापः
स्वसंनिवेशोचितभव्यदेशं ।
अध्यास्त सिद्धान(? l. स्त)समस्तशक्रा
स्पदं पुरं सादरमेकचक्रं ॥ १४ ॥ ०

यस्योपकंठे सितिकंठकंठ-
स्पर्धिप्रभा भानुसुता वहंती ।
तदुच्चवेदध्वनिसंनिकर्षाद्
अभ्यस्यतीवाखिलपावनत्वं ॥ १७ ॥ ०

पुरं शशासैव पुरंदराभस्
तदेकचक्राख्यमनेकचक्रः ।
असंख्यसंख्यारिजयोर्जिताख्य-
चिख्यासु (!) येनोद्धरणक्षितीशः ॥ २३ ॥

समुद्रैरपि यः सप्तसमुद्रैः संयुतां महीं ।
पालयंस्तन्महीपालः पुरालंकुरुते पुरं ॥ २४ ॥

गुणरत्नाकराचंद्रश्चंद्रसेनस्ततो ऽभवत् ।
महा महा स देवस्य शालिमौलिविभूषणः (!) ॥ २५ ॥

यस्य विश्वोपकाराय सदा सत्युद्यते करे ।
शशंके धनदः स्वैरं चकंपे कनकाचलः ॥ २६ ॥ ०

तस्यात्मजो ऽभूच्चरितार्थजन्मा
श्रीसूर्यसेनो जयति क्षितींद्रः ।
सुदर्शनेनैव बिभर्ति गोपी-
'नारायणत्वं भुवि यः प्रसिद्धं ॥ ३० ॥ ०

चकास्ति यस्यातिनलप्रतापः
प्रतापसेनो ऽवरजः प्रसिद्धः ।
भक्त्याभिरामस्य सदाग्रजस्य
यो लक्ष्मणाकारमुपैति भद्रं ॥ ४० ॥

औदार्यसौंदर्यदयानयाढ्या
विज्ञानशौर्यादिगुणेषु नान्यं ।
प्रतापसेनस्य समं समंताल्
लोके विलोके ऽत्र विचित्रलोके ॥ ४१ ॥

श्रीदेवसेनस्तनयो ऽपि गोपी-
नारायणस्याजनि कामरूपः ।
लब्धप्रसादेन महेश्वरस्य
ममारतिस्तुष्टिमुपैति यत्र ॥ ४२ ॥

देवसेनकुमारस्य कुमारस्य च नांतरं ।
आर्यानंदकृतो नित्यं विभाग्यां शक्तिमुत्तमां ॥ ४३ ॥

श्रीसूर्यसेनः पुरमेकचक्रं
वरांगमध्यास्य जयत्यजस्रं ।
यमन्यकांतं जितनाककांतं
गुर्वीयमुर्वीव सदोर्वरास्ते ॥ ४४ ॥
विद्वत्सु सत्स्वपि महत्सु समाश्रितेषु
श्रीसिद्धलक्ष्मणसुतः सुतरामुष्य ।
श्रीसूर्यसेननृपते[र्निजते]जसो ऽभूद्
अल्लाडनाथमतिमान[?]तिमानपात्रं ॥ ४५ ॥ ०
अगाधग्रंथपयोधिं तथालोड्य मया [धिया] ।
समुद्धृतं नृपादेशात्तेनेदं निर्णयामृतं ॥ ४७ ॥
मनुस्मृतिं विष्णुपराशराप-
स्तंबस्मृतीर्वीक्ष्य मिताक्षरां च ।
तथापरार्काणवपारिजातान्
स्मृत्यर्थसारं स्मृतिचंद्रिकां च ॥ ४८ ॥
मात्स्यं कौर्मं वाराहं च दृष्ट्वा वैष्णववामने ।
मार्कंडेयपुराणानि भविष्योत्तरभारते ॥ ४९ ॥
[परिशिष्टं हेमाद्रेरनंतभट्टीयगृह्यपरिशिष्टे ।
कालादर्शं चिंतामणिं त्रिदंडीं च कृत्यकल्पतरुं ॥ ५० ॥]
सकलपुराणसमुच्चयदुर्गोत्सवरामकौतुकानि तथा ।
संवत्सरप्रदीपं सभोजराजीयदेवदासीयं ॥ ५१ ॥
रूपनारायणीयं विद्याभट्टपद्धतिं विततां ।
वीक्ष्य महादेवीयं शुभं निबं[धं] च विश्वरूपकृतं ॥ ५२ ॥
श्रीसूर्यसेननृपतेरादेशात्सिद्धलक्ष्मणतनूजः ।
अल्लाडनाथसूरिः संग्रहमिह कालनिर्णयं कृतवान् ॥ ५३ ॥
इति ग्रंथावतारं ॥ अथानुक्रमणी ॥
ग्रंथे श्रीसूर्यसेनस्य निर्णयामृतसंज्ञके ।
आदावस्मिन्नुदाहारः कथितः प्रथितः क्रमः ॥

Śloka 50, omitted by the present MS., is found in other MSS., viz. Weber, Cat. Berl., no. 1170; Bhandarkar, Rep., p. 351; Burnell, Tanjore MSS., p. 130*b*.

For other MSS. see Rāj. Mitra, Notices, I., p. 151; IV., p. 285; also Cat. of Bikāner MSS., p. 426 ('written by *Gopīnārāyaṇa*, under the auspices of the King *Sūryasena*,' but beginning and ending differently).

Ch. I., *sāmānyatithinirṇayaprakaraṇa* ends fol. 16*b*; II., *sakalatithinirṇaya* (calendar of fasts and feasts), fol. 94*b*; III., *śrāddhanirṇayaprakaraṇa*, fol. 129*a*; IV., *āśaucaprakaraṇa*, ends:

कूष्मांडसंज्ञके घृतं हुत्वा विप्राय गां दत्त्वा पंचगव्यं प्राश्य शुद्धः । सूतकी आवश्यकं विवाहादिमंगलं कुर्यात् ॥ इति मंगलं ॥

इति श्रीसूर्यसेनमहामहेंद्रविरचिते निर्णयामृते आशौचप्रकरणं समाप्तं ॥

श्रीसूर्यसेनभूभृद्विमलयशःक्षीरसागरादुदिते ।
इति निर्णयामृते ऽस्मिन्नाशौचप्रकरणनिर्णयो जातः ॥ १ ॥
श्रीमत्पंडितलक्ष(सिद्ध fol. 16*b*)लक्ष्मणसुतः श्रीसिद्ध-
[लक्ष्मीपद-
द्वंद्वाराधनसुप्रसिद्धमहिमा यः सिद्धसारस्वतः ।
आदेशादकृतैष सूर्यमहसः श्रीसूर्यसेनप्रभोर्
वैधे कर्मणि कालनिर्णयमसावल्लाडनाथः सुधीः ॥ २ ॥

As the work is quoted in *Acala's Nirṇayadīpaka* (see the next MS.), it must have been composed prior to 1518 A.D.

[H. T. COLEBROOKE.]

1580–1582.

690–692. Foll. 510; size $9\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, about 1730 A.D.; 8 or 9 lines in a page.

Nirṇayadīpaka, a compendium of rules and opinions regarding religious practices and observances, compiled, in Saṃvat 1575 (A.D. 1518), by *Acala Dviveda* (*Dvivedin*), surnamed *Bhāgyavateya*.

The author, who was one of three sons of *Vatsarāja*, and a native of Vṛiddhapura, carries his genealogy still further up through *Govinda*, *Lakshmīdhara*, and *Ananta* to *Dhāvigadeva* (?).

It begins (as corrected with the help of the next MS.):

हेरंबः सर्वकार्यार्थसिद्धिदः सर्वदा सतां ।
सिद्धिबुद्धियुतः सो ऽस्तु ग्रंथनिर्मितिकर्मणि ॥ १ ॥

देवः श्रीशंभुजन्मा गणपतिरखिलान्नागरानार्थबुद्धीन्
  रक्षत्वस्मिन्समस्ते जगति तु भयतो यत्र कुत्र स्थितांश्च ।
येषां सत्प्रवृत्ता परमविधियुता पंचयज्ञान्विता या
  धर्म्या स्वाचारयुक्ता न विरमति यतो नित्यचर्या कदा-
[चित् ॥ २ ॥
षट्कर्मधर्मनिरतैरपि चातिथेयैर्
  यज्ञक्रियाकुशलिभिस्तु विचारगर्भैः ।
धर्म्यैर्द्विजैश्च शरणागतसाधुवृत्तैर्
  आस्थापितं पुरवरं हि शिवेन वृद्धं ॥ ३ ॥

विद्यावृद्धा धर्मवृद्धा ज्ञानवृद्धा हि ये नराः ।
वसंति यत्र तेनैतद्बुद्धा वृद्धपुरं विदुः ॥ ४ ॥

आचार्यतामुपगताय चतुर्मुखाय
  शंभुः स्वयं स्वकरसक्तविवाहशोभः ।
शैलांगजोद्वहनपर्वणि संव्यतारीत्
  तीर्थास्पदं नगरमेतदमर्त्यसद्म ॥ ५ ॥

नास्माभिर्ननु नागरस्य पुरतो वेदार्थवादः कदा
  ज्ञेयो यत्र महन्नृपैरिति (? त्तमै॰) शिशोर्ब्रह्मर्षिभिर्निर्गतं ।
दुर्वासा वसति स्म नागनिलये व्यासो ऽपि काशीपुरे
  ऽगस्तिः स्वस्ति समुच्चरे[त्] त्रिजगतां लंकाकृतात्मा-
[लयः ॥ ६ ॥
अतः सन्मानमर्हंति सर्वेभ्यो नागरा ननु ।
यतो ब्रह्मर्षिराजर्षिदेवर्षिभिरुपासिताः ॥ ७ ॥

ये नागरा भूवलये प्रसिद्धाः
  श्रुत्युक्तमार्गाचरणे प्रगल्भाः ।
द्रव्यप्रदानात्मकुबेरशोभा
  धर्मद्विषः प्रत्यनिशं कठोराः ॥ ८ ॥

तेषु व्यक्तिरभूदेका मडोडेत्यभिधोत्तमा ।
तस्यां धारिगदेवो भूधरायां (?1. ऽभूद्ध॰) धर्मवर्धकः ॥ ९ ॥

अनंतनामा समभूत्तदंगजो
  यो ऽध्यापिपद्वेदमनंतवाडवात् ।
अनंतभक्त्या निजजन्म सार्थकं
  कृत्वा ययावीश्वरधाम निर्मलं ॥ १० ॥

लक्ष्मीधरः सूनुरभूदनंताद्
  आनंददायी भुवि भूसुराणां ।
यस्मिन् द्विजे श्रीश्च सरस्वती च
  कुटुंबभावेन सदोषतुस्ते ॥ ११ ॥
लक्ष्मीधरादात्मजंतुर्द्विजेशो
  गोविंदनामा भुवि विश्रुतो यः ।
वेदार्थविद्वैदिककर्मविज्ञो
  विद्वद्द्विजैरर्चितपादपद्मः ॥ १२ ॥

तस्यात्मजो ऽभून्ननु वत्सराजो
  वत्सैस्त्रिभिर्विस्तृतवंशराजः ।
यो धर्मवर्त्माश्रयराजराजः
  सर्वार्थविज्ञानविधौ स्वराजः (!) ॥ १३ ॥

श्रीवत्सराजादचलद्विवेदी
  जनुर्दधद्विप्रजनांह्रिरेणुः ।
श्रीनागराणां श्रुतिसागराणां
  करोति किंचिच्छुभकर्मसिद्धै ॥ १४ ॥

श्रीमन्महारुद्रभवं विधानम्
  ऋग्वेदिविप्राग्रमतारिपं यत् ।
तस्यानुजं निर्णयदीपिकाख्यं
  ग्रंथं वचोमोहहरं करोमि [करोति 2595] ॥ १५ ॥ ॰

द्विवेदीविदुषां प्रधानमभवच्छ्रीवत्सराजो द्विजस्
  तत्सूनुः सकलद्विजांह्रिरजसामंशः कृती यो ऽचलः ।
तेनायं क्रियते प्रियाय विदुषां सन्निर्णयाकांक्षिणां
  ग्रंथो निर्णयदीपको ऽधिवसता श्रीपूर्ववृद्धं पुरं ॥ १८ ॥

जनकं स्वं प्रणम्याथ गुरुं भट्टविनायकं ।
तिथ्यादेर्निर्णयं ब्रूते ऽचलो नागरवाडवः ॥ १९ ॥
तिथ्यादिकं चोदनातः (!) श्राद्धदानादिकर्मसु ।
अंगत्वेनेष्यते तस्मान्निर्णेतव्यत्वमर्हति ॥ २० ॥

आदिशब्देन कालो नक्षत्रादि च । ॰

इति ° मंडपदेवकादिप्रतिष्ठा fol. 83*b*; ° देवकोत्थापनादि 84*b*; ° नववधूगृहगमनविधिः 85*a*, etc.

This portion ends: इति प्रयोगरत्ने अर्कविवाहः ॥ see above, no. 471 (MS. 2794, fol. 118).

[H. T. COLEBROOKE.]

1758.

178. Foll. 199; size 12½ in. by 4 in.; fair Devanāgarī writing, of 1806 A.D.; ten lines in a page.

Śāntiratna, or *Śāntikamalākara*, another treatise on lustrations, and the means of averting evil omens, by *Kamalākara Bhaṭṭa*, (second) son of *Rāmakṛishṇa Bhaṭṭa*.

It begins:

नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरसंज्ञेन प्रोच्यंते शांतयः क्रमात् ॥

तत्र । एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमाम् ॥

इति याज्ञवल्क्येन सर्वकर्मांगत्वोक्तेर्विनायकशांतिरुच्यते । °

इति ° विनायकशांतिः fol. 7a; इति ° सर्वकर्मस्वग्निनिर्णयः । अथ सर्वशांतिकप्रकृतित्वाद्ग्रहयज्ञः 10b; इति ° शतमुखादिकोटिहोमः 29b; इति ° नवग्रहयज्ञः । अथ प्रसवशांतयः 35b; इति गंडांतशांतिः 39a; इति ° कृष्णचतुर्दशीशांतिः 41b; इति सिनीवालीकुहूशांतिः 43b; इति ° दर्शशांतिः ॥ इति तिथिशांतयः ॥ अथ नक्षत्रशांतयः । 45a; इति ° ज्येष्ठाशांतिः 47a; इति ° मूलशांतिप्रयोगः 58a; इति° आश्लेषाशांतिः 64a; इति ° प्रसवशांतिः 64b; इति° एकनक्षत्रजननशांतिः 64b; इति ° व्यतीपातादिशांतिः । अथ ग्रहणशांतिः 96a;—इति ° ज्वरोत्पत्तिनक्षत्रशांतयः ॥ अथ रविशांतिः 120a; इत्यंगारकशांतिः 120b; इति बुधशांतिः 121a, etc.; इति ° अद्भुतसामान्यशांतिः । अथ नानोत्पातशांतयः । 133a;—इति ° रुद्रविधानं समाप्तं । अथ वेदपारायणं 155a; इति वास्तुशांतिः । अथास्मत्पितृकृतो वास्तुशांतिप्रयोगः 166a; इति श्रीमद्विद्वद्वृंदवंद्यपादपद्मश्रीभट्टनारायणसूरिसूनुभट्टरामकृष्णविरचितः पौराणवास्तुप्रयोगः 171b; इति ° अर्कविवाहः 178b; इति ° रामकृष्णभट्टकृतो रुद्रस्नानविधिः 183b.

It ends:

श्रीमन्नारायणाख्यात्समजनि विबुधो रामकृष्णाभिधानस्
तत्सूनुः सर्वविद्यांबुधिनिजचुलकीकारतः कुंभजन्मा ।
दृष्ट्वा नानानिबंधान् व्यरचयदतुलं ग्रंथमन्नाकराख्यः
पित्रोः पादाब्जभृंगो रघुपतिपदयोः स्वश्रमं प्रार्पयच्च ॥
[(r. संश्रयं प्राप्य यत्नात्)

इति शतचंडीसहस्रचंडीप्रयोगः ॥ (Rāj. Mitra, Notices, V., p. 270).

यो भाट्टतंत्रगहनार्णवकर्णधारः
शास्त्रांतरेषु निखिलेष्वपि मर्मभेत्ता ।
यो ऽत्र श्रमो ऽस्ति विहितः कमलाकरेण
प्रीतो ऽमुनास्तु स कृती बुधरामकृष्णः ॥

इति श्रीमत्पदवाक्यप्रमाणपारीणरामेश्वरभट्टसूरिसूनुनारायणभट्टसुतमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृतं शांतिरत्नं समाप्तं ॥

Foll. 68–95, written by a different hand, have been inserted there, but apparently belong to some other part of the work.

For another MS. of the work, see Bikāner Cat., p. 455; for a *Śāntiratnākara*, by the same author (probably the same work), see Burnell, Tanjore MSS., p. 138b.

The author wrote his *Nirṇayasindhu* in 1611–12 A.D. [H. T. COLEBROOKE.]

1759.

160b. Foll. 206; size 12 in. by 4½ in.; legibly written, in Devanāgarī, in 1801 A.D.; ten lines in a page.

The same work. [H. T. COLEBROOKE.]

1760.

917. Foll. 80; size 12½ in. by 4 in.; very fair, modern Bengalī handwriting; seven lines in a page.

Śāntikatattvāmṛita, a manual of directions for averting evil omens and propitiating astral influences, by *Nārāyaṇa Śarman.*

It begins:

नत्वा गोपीकान्तं मत्वा च विविध[वि]बुधवाक्यानि ।
श्रीनारायणशर्मा शान्तिकतत्त्वामृतं तनुते ॥
अद्भुतसिन्धुप्रमुखे तत्तन्मूले पुराणादौ ।
नानास्थाने ये ऽर्थास्ते ऽस्मिन् ग्रन्थे समासेन ॥

तत्र शान्तिलक्षणमाह स्मृतिः । °

It ends: धेनुं सुवर्णं च दक्षिणां दद्यादित्यर्थः ॥ इति ग्रहशान्तिपरिच्छेदः ॥ and by a different hand: इति श्रीनारायणशर्मकृतं शान्तिकतत्त्वामृतं समाप्तं ॥

See Rāj. Mitra, Notices, II., p. 9; VII., p. 233. [H. T. COLEBROOKE.]

1761.

665a. Foll. 1–18; 4to.; size 11½ in. by 9 in.; European paper; fairly written, in Devanāgarī; fifteen lines in a page.

Mahāśānti, a treatise on expiatory and propitiatory rites, in two adhyāyas of 18 and 25 sections resp.

It begins: ओं नमः श्रीवेदब्रह्मणे । श्रीहरिः ओं ॥

महाशांतिं प्रवक्ष्यामि यां प्राप्य महतीं श्रियं ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वाप्युपसर्जति ॥
ब्राह्मणः सर्वकामाप्तिं क्षत्रियः पृथिवीजयं ।
सर्वतस्तु समृद्धिं च वैश्यः समधिगच्छति ॥
दिव्यं वा पार्थिवं वापि ह्यांतरिक्षमथापि वा ।
महाशांतिः प्रशमयत्यन्यद्वा भयमुच्छ्रितं ॥

Chapter II. begins: अथ नक्षत्राणामुपाचारं वक्ष्यामो हतवासाग्नेः(? अहतवासा अग्नेः) पुरस्तादहतेन वस्त्रेणोदग्दशेनात्मन्यवसाय कृत्तिकादीन्यञ्जायावाहयेदावाहयिष्यामि °

It ends:

समाप्तेयं महाशांतिः प्रेमानंदलिपीकृता ।
प्रतापोर्हंडमाश्लिडकोलबुरुकप्रभोः कृते ॥

For the first part of this treatise see Weber, Cat. Berl., no. 1249. [H. T. COLEBROOKE.]

1762.

1730a. Foll. 44; size 8½ in. by 4 in.; indifferent Devanāgarī writing; nine lines in a page.

[*Navagraha-*] *Śāntipaddhati*, a manual of directions for the propitiation of the nine planets, according to the *Sāman* ritual, by *Śivarāma*, son of *Viśrāma*.

It begins:

प्रणम्य तातं विश्रामं विघ्नेशं जगदंबिकां ।
ग्रहशांतिविधिं वक्ष्ये सामगानां हिताय वै ॥

Then follows a lacuna, space being left for some three or four lines; after which it proceeds:

गर्भाधानादिविवाहांतसंस्कारकर्मसु क्रियमाणो नैमित्तिकः । संपदादिफलोद्देशेन क्रियमाणः काम्यः॥ तत्र नित्ये नैमित्तिके च न विहितकालनिमित्तकालाद्यपेक्षा। काम्ये तु सर्वांगोपेतस्यैव फलवत्त्वाद्विहिते एव काले अनुष्ठानं । तस्मात्काम्यस्तु ज्योतिर्विदादिष्टे शुभे ऽह्नि कर्तव्यः । काम्ये ग्रहयज्ञे मंडपकुंडादि यथोक्तमेव सर्वं कार्यं ॥ इति परिभाषा ॥ अथ कर्मक्रमः ॥ °

इति गणपतिपूजा fol. 3*b*; ऋत्विग्वरणं 6*b*; स्वस्तिवाचनं 7*a*; कौतुकबंधः 7*b*; अग्निस्थापनं 10*b*; ° ग्रहाणां स्थापनं 18*b*, etc.

It ends: चतुर्भिर्ब्रेत्यग्निं प्रणम्य यथाविभवं ब्राह्मणान्संपूज्य इष्टान्नेन संभोज्य दीनान्धकृपणेभ्यो यथाविभवमन्नादि दत्वा इष्टैर्बंधुभिश्च परिवृतः स्वयं भुक्त्वा आत्मानं कृतार्थं मन्वीत॥

इति विद्वन्मुकुटमाणिक्यनीराजितचरणकमलयुक्तश्रीविश्रामात्मजशिवरामविरचिता नवग्रहाणामयुताहुतिहोमात्मिका शांतिपद्धतिः समाप्ता ॥ सं° १८०६ वर्षे फाल्गुणवदि ७ मंदे लि° व्रा· आशारामेण ॥

For the same author's *Chandogāhnīyāhnika*, see above, no. 455. [H. T. COLEBROOKE.]

1763.

1460. Foll. 409; size 8½ in. by 4½ in.; written, in Devanāgarī, by different hands, in the (16th or) 17th century; 9–15 lines in a page.

Mahārṇava, a comprehensive work on expiations for removing and obviating diseases and evil influences resulting from deeds in a former existence (*karmavipāka*); compiled by *Bhaṭṭa Viśveśvara*, son of *Peṭṭibhaṭṭa*, under the auspices of *Māndhātṛi*, younger son of *Rājā Śrī-Madanapāla*, and brother of *Prithvīmalla* (author of *Śiśurakshāratna*).

The work begins:

नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥ १ ॥
प्रवालाद्रिप्रस्यद्युतिनिचयपर्यायवपुषे ° ॥ २ ॥

Cf. *Smṛitikaumudī*, Aufrecht, Cat. Bodl., no. 653, verses 3–12.

यदिंदिरानाथपुरंदराद्यैराराधितं ° ॥ ३ ॥
प्रकृष्टचलकुंडलस्तबकघृष्टगंडस्थलं ° ॥ ४ ॥
कांते कृतागसि ° ॥ ५ ॥
आसीदसीमगुणटाककुलांबुराशाव् °
श्रीरत्नपालनृपतिर्भुवनैकरत्नं ॥ ६ ॥
तस्यानुजो भरहपाल इति प्रसिद्धः ° ॥ ७ ॥
सुतो ऽस्य जातः सुकृतोन्नतस्य °
नाम्ना हरिश्चंद्र इति व्यधत्त ॥ ८ ॥

तस्यात्मजो ऽभूदतुलप्रतापः साधारणो भूमिपतिर्वदान्यः। ०
पंथच्छिदां विरुदकीर्ति ० ॥ १० ॥ [॥ ९ ॥
अस्यात्मजः श्रीमदनेन नाम्ना ० ॥ ११ ॥
यः कूपानारामान् ० ॥ १२ ॥ Aufr., Cat. Bodl., [no. 651, v. 17.
परिशीलयता कलाकलापं
विदधानेन च भूरिशः प्रबंधान् ।
मदनेन महीभृताथ येन
प्रथिता नूतनभोजराजकीर्तिः ॥ १३ ॥
पुत्रेषु सत्स्वपि कलत्रयुगे ऽथ तस्य
पुत्रौ जगत्त्रयविसृत्वरकीर्तिपूरौ ।
जातौ प्रियावतितरां प्रथमप्रसूतौ
नीतौ महोन्नतिमनल्पगुणैर्विनीतौ ॥ १४ ॥
उदारशीलौ सुमनोविलास-
मनोज्ञवृंदावनकेलिलोलौ ।
यशोदयावर्धितमंगलांगौ
यौ रामकृष्णाविव संप्रतीतौ ॥ १५ ॥
यच्छैशवानुकरणं न युवा न वृद्धः
शक्नोति कर्तुमपरः श्रुतसद्गुणो ऽपि ।
दानं निदानमखिलार्थिजनार्थसिद्धेः
कीर्तिर्दिगंतविततां च यतस्तदीया ॥ १६ ॥
अप्रतिमल्लः पृथिव्यां पृथ्वीमल्लस्तयोरभूज्ज्येष्ठः ।
अपरो मांधातृगुणैर्मांधाता गीयते जगति ॥ १७ ॥
सो ऽयं सुकृतविधाता रिपुकुलजेता तनोति मांधाता ।
विद्वन्मुखेन मतिमान् सत्कृतिरत्नं महार्णवं नाम ॥ १८ ॥
श्रुतिस्मृतिपुराणानि समालोक्य यथामति । [१९ ॥
निबध्यते (विरच्यते C) समासेन निबंधो ऽयं महार्णवः ॥

[Here the present MS. (A) inserts the following five verses (some of which occur again at the end of some chapters), and a short prose section:

पेह्विभट्टात्मजः (!) श्रीमान् भट्टविश्वेश्वरः सुधीः ।
महार्णवाभिधं स्मार्तं निबंधं कुरुते कृती ॥ २० ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परा* शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमियाद्
इयं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥ २१ ॥

* Thus also A, B, C at the end; see *Madanapārijāta*, ed., Bibl. Ind., p. 128.

माता पुण्यचरित्रकीर्तिविभवा यस्यांबिका नामतः
शाकल्यापरमूर्तिरार्यचरितः श्रीपेह्विभट्टः (!) पिता ।
सो ऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
वेदे स्मार्तमते नये च सपदे वाक्ये कृती वर्धते ॥ २२ ॥
दुष्कर्मपाकजनितामयकर्षितानां
सत्कर्मशर्मकरमित्युदितं मुनींद्रैः ।
तत्सांगजातमितरोक्तिविधानपक्षं
वक्ष्यामि रोगनिखिलार्तिनिबर्हणाय ॥ २३ ॥
एनोविपाकः परतः कीर्त्यते कालनिर्णयः ।
कृत्यं च हायनस्येति निबंधे ऽस्मिन्ननुक्रमात् ॥ २४ ॥

then follows a short passage: ननु कथं कर्मविपाककालनिर्णयवार्षिककृत्यानां पौर्वापर्यं । ० ending
इति पेह्विभट्टात्मजभट्टविश्वेश्वरविरचिते महार्णवाख्ये कर्मविपाके संगतिः समाप्ता ॥ अथ वक्ष्यमाणसकल ०]

तत्र तावद्वक्ष्यमाणसकलकर्मोपयोगित्वेन कर्मविपाकरूपरोगादिनिवृत्त्यर्थं प्रायश्चित्तादेरवश्यकर्तव्यता प्रतिपाद्यते। तद्यथा ०

The work consists of forty chapters, or waves (*taraṅga*), the first seven of which (ending fol. 235*b*) treat of *prāyaścitta*, as a religious observance for the improvement of a man's future prospects; while the remaining chapters deal with *karmavipāka* more especially, and aim at "taking away the gripe of a particular malady." While the former section draws its prayers and invocations largely from the *Veda*, particularly the *Yajurveda*; *Purāṇas* and *Tantras* have supplied most of the materials for the second section. The authority most frequently laid under contribution is the *Śātātapīya Karmavipāka*. The following may serve as a specimen of the endings of chapters, and the subjects treated:

महार्णवाख्ये महति प्रबंधे
मांधातृनाम्नो मदनात्मजस्य ।
सत्कर्मरत्नौघनिदानमाद्यस्
तुंगस्तरंगो ऽयमगादगाधः ॥ fol. 6*a*;

इति शातातपीयकर्मविपाकोक्तपरिभाषा 9*a*; इति जमदग्निप्रोक्तः कूष्मांडहोमविधिः 11*a*; इति बौधायनोक्तः कूष्मांडहोमविधिः 12*a*; आज्यहोमविनियोगः 19*a*; इति कूष्मां-

डहोमानुष्ठानक्रमः ॥ ० द्वितीयस्तरंगः ॥ 27*b*; इत्यापस्तंबीयो गणहोमविधिः 29*a*; चरुहोमविनियोगः 37*a*; इति० तृतीयस्तरंगः 42*a*; इत्याश्वलायनघोषशांतिः 52*b*; इति तैत्तिरीयघोषशांतिः 75*a*, etc. Up to fol. 50, and on foll. 73–75, the *mantras* are accented.

The chapter on *vināyakaśānti*, referred to in the author's *Smṛitikaumudī* (Aufrecht, Cat., p. 277*a*), is found on foll. 155*a*–160*b* of the present MS.

The last few leaves of the MS. have been partly restored by a more modern hand.

It ends: इति मेषग्रहहरणं ॥
मतिर्येषां शास्त्रे ० see above ॥ १ ॥

कविराधुनिकश्चिरन्तनो वा
न विशेषः क्वचिदस्ति सज्जनानां ।
इयतैव जितं मया यदेषाम्
अतिलोकेषु गुणेषु पक्षपातः ॥ २ ॥

इति श्रीपंडितपारिजातकभट्टारमल्लेत्यादिविरुदराजीविराजमानश्रीमदनपालपुत्रस्य मांधातुर्निबंधे महार्णवाभिधाने कर्मविपाके ग्रहप्रकरणं समाप्तं ॥ समाप्तश्च महार्णवनामनिबंधः ॥

[H. T. COLEBROOKE.]

1764.

2152. Foll. 404; size 11 in. by 5 in.; good, large Devanāgarī writing, of about 1750 A.D.; ten lines in a page.

The same work [B].

This copy ends, foll. 395*b*-396*a*: इति मेषग्रहहरं॥
मतिर्येषां ० ॥ १ ॥

महार्णवाख्ये महिते प्रबंधे
मांधातृनाम्नो मदनात्मजस्य ।
सत्कर्मरत्नावलिभृद्य(!) चत्वारिंशत्तरंगो ऽयमगादगाधः ॥ २ ॥

समाप्तो ऽयं महार्णवनामा निबंधः ॥

Then follow eight leaves, containing a list of contents, written in triple columns.

[GAIKAWAR.]

1765.

3251. Foll. 410; size $7\frac{3}{4}$ in. by $6\frac{1}{4}$ in.; written, in the Śārada character, on birch bark, by two different hands; 15–17 lines in a page.

The same work [C].

The first leaf is missing, the second leaf beginning with the last *pāda* of verse 4 (प्रकृष्टचल ०) of the introduction, viz. महः किमपि मोहनं कपटशैशवं-- this leaf, as well as the next, is however sadly injured through the bark having peeled off.

A facsimile of one of the pages of this MS. has been published in the Palæographical Society's Oriental Series, part IV., with a descriptive account by Dr. Haas. The writing material used being of a very delicate nature, the MS. has to be handled with extreme care. It is wrapped in a plain case of limp leather, stamped with an ornamental edging.

The MS. ends on fol. 401*a* with the same two *ślokas* as MS. A, but the second is slightly defective; whilst of the colophon the copyist only wrote इति श्रीपंडितः; which is followed by an *anukramaṇikā* to the work.

Several lacunæ occur in the body of the work, esp. one extending from fol. 149*b* to 160*a*.

[G. BÜHLER.]

1766.

201. Foll. 99; size $10\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fairly good Devanāgarī writing, of 1639 A.D.; ten lines in a page.

Karmavipākasāra, a digest of directions for the expiation and removal of the evils resulting from sins in a former existence, especially maladies of all kinds, by *Dinakara*, son of *Rāmakrishṇa* and *Umā*, and grandson of *Nārāyaṇa Bhaṭṭa*. It begins:

प्रासूतोमा प्रसूयै तनयमिह पिता रामकृष्णश्च सो ऽयं
प्रायश्चित्तेषु सारं दिनकरविबुधः शांतिकानां च सारं ।

कृत्वाद्यो कर्मपाकेष्वखिलबुधमुदे सारमेतं तनोमि
श्रीरामांघ्रिप्रभावादयमपि भजतां ख्यातिमुच्चैर्धरायां॥१॥
ग्रंथे कर्मविपाकीये ये मयार्था निरूपिताः ।
तेषामादौ सुबोधाय क्रियते ऽनुक्रमः स्फुटः ॥ २ ॥
प्रारब्धनाशो दानादेः प्रायश्चित्तैः समुच्चयः ।
रोगाणां तारतम्येन द्वादशाब्दतदर्धकं ॥ °

This *anukramaṇikā* consists of 50 *ślokas*, ending thus:

दारिद्र्यहारि धनदं मूर्तिदानं ततः परं ।
श्रीसूक्तस्य विधिस्तद्वद् रत्नदानं समृद्धिदं ॥

नन्वनिष्टहरत्वाविशेषाच्छांतिककर्मविपाकयोः को भेदः । उच्यते। भाव्यनिवारकर्म विपाकत्वं। कर्मविपाकशब्दश्च कर्मणां विशेषेण पचनमिति व्युत्पत्त्या व्याध्यादिषु मुख्यः। तद्विपाका जात्यायुर्भोगा इति पातंजलसूत्रात्। तन्निवर्तककर्मसु लाक्षणिकः।

It ends: इति श्रीसूक्तं हेमाद्रौ संवर्तः ॥
समुद्रजानि रत्नानि नरो विगतकल्मषः ।
दत्त्वा विप्राय महते प्राप्नोति महतीं श्रियं ॥
श्रीरामेश्वरसूरिसूनुरुदभूद्यो भट्टनारायणः
क्षोणीपंडितमानखंडनजयी श्रीरामकृष्णस्ततः ।
मीमांसानयतत्त्वविद् दिनकरस्तस्मादभूत्तत्कृतिः
सेयं कर्मविपाकसारविषया रामाय दद्यान्मुदं ॥

इति श्रीमद्रामेश्वरसूरिसूनुश्रीमन्नारायणसुतश्रीमद्रामकृष्णसुतदिनकरकृतः कर्मविपाकसारः समाप्तः ॥ संवत् १६९६ समये वैशाखवदी चैदशीवरशुभदी लिखितं सत्रपतीब्राह्मण कासिके वाशी(!) ॥

See Rāj. Mitra, Notices, VII., p. 303. A different work of the same title, Bikāner Cat., p. 405. [H. T. COLEBROOKE.]

1767.

2652. Foll. 250 (wanting foll. 1, 8, 31, 41, 43, 161, 163, 191, 218, 227–34; double nos. 99, 118, 144); size 10 in. by 6 in.; careless Devanāgarī writing, of 1533 A.D.; nine lines in a page.

Sāragrāha-Karmavipāka, a similar digest, by one who calls himself the eldest son of *Kāhnaḍa*, or *Kānhaḍa* (i.e. *Kṛishṇa*), and grandson of *Padmanābha*.

The work seems to have been compiled, in 1384 A.D., under the patronage of *Karṇasiṃha*, minister to King *Durgasiṃha* of *śrī-Nanda-padra*(?), son of *Maṅgala Bhūpāla*.

The present MS. commences in the fourth verse of the introduction; but the beginning, as well as some of the defective verses further on, are here supplied [in brackets] from a collation of four Bombay MSS. kindly sent by Professor R. G. Bhandarkar:

[यो देवः किल पूर्वसर्गसमये संस्मर्यते ब्रह्मणा
यश्चादौ सुरसिद्धदैत्यमनुजैरभ्यर्च्यते कर्मणा ।
विघ्नव्रातविघातजातकठिनं कुंठं कुठारं करे
बिभ्राणं तमुपास्महे गजमुखं सिद्धेः परं कारणं ॥ १ ॥
वंदे विश्वनुतां पितामहसुतां वाग्देवतामेव तां
यस्याः पुण्यपदप्रसाददलिताशेषोग्रजाड्यो जनः ।
उद्यत्पार्वणचंद्रसांद्रितसुधापाथोधिवीचिच्छटा-
निर्णिक्ताननवर्णवाक्यनिकरैर्विद्वत्सु संदीव्यति ॥ २ ॥
तमादिदेवं जगतामधीशं
चतुर्मुखं ध्यानजुषं प्रपद्ये ।
चराचरं यत्स्मरणाद्बभूव
विद्यास्तथाष्टादश यन्मुखेभ्यः ॥ ३ ॥
विश्वत्रातारमीशं दलितदनुसुतं मुक्तिदं भक्तिभाजां
विश्वग्रूपं विशुद्धं विबुधजनघनप्रीतिदं योगिगम्यं ।
विष्णुं कालग्रसिष्णुं करकहितग]दाशंखचक्राब्जचापं
पापं विद्रावयंतं भवजभयहरं ब्रह्ममूर्तं प्रपद्ये ॥ ४ ॥
देवं सुधाकरकलाकलितोत्तमांगं
त्र्यक्षं त्रिशूलधरमद्रिसुतावृतांगं ।
कोपप्रसादमतिवर्जितमुग्रवीर्यं
वंदे सुरर्षिगणं सिद्धतनुं वृषांकं ॥ ५ ॥
अथ ॥ दृष्टं यदत्र तत्तस्मान्नीत्वा सारं हि शास्त्रतः ।
ग्रंथकर्तुरथो व्यक्तिः प्रोच्यते परमार्थतः ॥ ६ ॥
[राजा] यत्र सुरे(l. पुरे) सुरेश्वरसमः श्रीदुर्गसिंहो महान्
अङ्गा यस्य तनोः पदे च महिषी धन्यांबिका राजते*।
[यत्साचिव्य]धुरां परां कलयति श्रीकर्णकंठीरवः
कस्तद्वर्णयितुं क्षमः क्षितितले श्रीनंदपुत्रो(पद्रं Bo.)
[तस्मिन् ॥ [बुधः ॥ ७ ॥

* रापते MS. In the only Bomb. MS. which has this *śloka*, this *pāda* reads thus: स्वर्धांगे ननु यस्य पट्टमहिषी–यांबिका राजते ।

येनादौ] जगदीश्वरेण हि भिना(जनता Bo.) मर्यादया [स्थापिता
ये दायेन समुद्धृतावनिभृता धर्मद्रुहो नाशिताः ।
सोऽहं(l. ऽयं) संप्रति दुर्गसिंहनृपते(ति Bo.)र्गोत्रावतीर्णो- [शतस्(डतस् MS.)
तत्तत्सर्वमिदं करोति यदहो नान्येन निष्पद्यते ॥ ८ ॥

तस्मिन् राज्ये
वेदव्यास इव प्रपंचचतुरस्तच्छिष्यतां नाटयन्
आसीद्विश्वपुराणपाठनिरतः स्वाचारवान् शुद्धधीः ।
विख्यातो भुवि चित्रकूट इति वै यो नागरज्ञातिषु
प्रज्ञागर्वितवाचकेषु धिषणः श्रीपद्मनाभाभिधः ॥ ९ ॥

तस्यात्मजः काह्नडदेवनाम्ना(l. नामा)
व्यासः प्रयासैकमतिः सुपुत्रै[: or त्रे] ।
गयाप्रयागादि विगाह्य तीर्था-
न्यनेकशोंकं(l. गं) विमलीचकार ॥ १० ॥

[य]स्त्वगण्यकृतपुण्यसंचयै[रु]द्दधार निजपूर्वपूरुषान् ।
उद्यमै[र]निधिरुत्तमात्मधीर्ज्ञातिमंडनमिहावभासते॥११॥

तस्य वश्यमनसः सुतो ऽग्रजः
शास्त्रसारकृतसंग्रहव्रजः ।
लोकशोककरकर्मकृंतनः(र्न v.l.)
शास्त्रशस्त्रमिदमाबबंध सः ॥ १२ ॥

शास्त्रेभ्यः सारमादाय केवलं ग्रंथधारणं ।
तस्मादस्मासु तुष्यायंतु(l. तुष्यंतु) सूरयः शास्त्रपारगाः॥१३॥

तद्यथा तथ्यमेव सिद्धं(द्ध v.l.)नृपतिभर्तृहरिवाक्यं ।
नमस्यामो देवान्ननु हतविधेस्ते ऽपि वशगा विधि°
तस्माद्ग्रंथकथ्य । [(*Bh., Nīt.* 92 or 94) ॥ १४ ॥

यदैहिकामुष्मिकभावसिद्धं
बुद्ध्या वियुक्तमुत बुद्धिवृद्धं ।
यत्कर्म दैवाख्यमिह प्रसिद्धं
शुभाशुभं नौमि तदीशनद्धं ॥ १५ ॥

तत्र मादं(तत्राप्यरं Bo.) दुःखकरं नराणां
शुभेतरत्कर्म निरीक्ष्य पाके ।
यद्दूचुराद्या मुनयो विचार्य
निजार्थबुद्ध्या विविधप्रकारं ॥ १६ ॥

गर्गो मनुर्गौतमयाज्ञवल्क्यौ
बोधायनः सुश्रुतशालिहोत्रौ ।
शातातपः प्राणिगणानुकंपी
पुराणकर्ता यदुवाच वेधाः ॥ १७ ॥

नानाभेदेषु वेदेषु यद्यदुक्तं मनीषिभिः ।
धर्मशास्त्रपुराणेषु कर्म किं पाकलक्षणं ॥ १८ ॥
किंचिद्गर्गाद्गौतमाच्चापि किंचित्
किंचिन्नीत्वा सुश्रुताच्छालिहोत्रात् ।
मन्वादिभ्यः सत्यवत्याः सुताच्च
पौराणेभ्यः सा..दाय किंचित् ॥ १९ ॥
विद्वज्जनविनोदाय हिताय भुविनां(l. भु°) भुवि ।
सारग्राहमिदं नाम्ना साम्नायं शास्त्रमुद्धरे ॥ २० ॥ °

Fol. 5*b*: इति सारसंग्रहे(!) कर्मविपाके देवकल्पनाप्रकरणं ॥ अथ प्रकरणाधिकारसंख्या ॥ तत्र

मौलगिनृपतिविरचितं कर्मविपाकं यतः पुरस्कृत्य ।
रचितो ग्रंथस्तस्मात्प्रक्षिप्तं नाम तस्यापि ॥ १ ॥
ग्रंथे प्रकरणान्यत्र पंचपंचाशदेव हि ।
अधिकाराः पंच युक्ताश्चत्वारिंशत्समन्विताः ॥ २ ॥
शतत्रयं परिख्याता दानानां(!) शांतिकारणं ।
पंचाशद्भिरुपेतानि अष्टौ चैव शतानि तु ॥ ३ ॥
चत्वार्येव सहस्राणि ग्रंथवृत्तश्लोकानि संख्या प्रकीर्तिताः(!) ।
एवं ५२०० श्लोकसंख्या प्रकीर्तिता ॥
एवं मयाधिकाराणां संख्या ग्रंथस्य च स्मृता ।
न संशयो ऽत्र कर्तव्यो न न्यूनमधिकं भवेत् । अथ सारग्रहणं ।
षट्सप्ततिसमायुक्तं विज्ञानेशाच्छतद्वयं ।
पंच बोधायनीयानि गृहीतानि शतानि च ॥ °

Thus the author states that his compilation is principally based on *Maulaji Nripati's Karmavipāka*, 1000 *ślokas* (in round numbers) having been taken therefrom, interlaced with quotations from other sources (*Vijñāneśa, Baudhāyana, Śātātapa, Dānakhaṇḍa, Ācāradīpa, Jñānamaṇḍala, Āyurveda, Bālacikitsā, Purāṇas* (of which he knows eighteen), and other works, the whole amounting to 5200 *ślokas*. After this statement he proceeds: अथ मौलगिः ।

नत्वा श्रीशमुमेशदंतिवदनौ शक्तिं ग्रहान् वाडवान्
पुण्यानां तु निजापराध[ज]नितं दंडं विधायाधुना ।
श्रीमान्मौलगिभूपतिः स्वविहितं धर्मं प्रजापालनं
सम्यक्कर्तुमपुण्यरोगशमनं ब्रूते विधिं शास्त्रतः ॥
शास्त्रत इति तदाह ।
पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः ।
वेदा स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ °

अथोद्देशेन व्याधयः fol. 15a; अथ स्त्रीणामाचारवाक्यानि 16b; इति ज्ञानमंडलोक्तस्त्रीकर्मविपाकः 20a; इति ज्ञानमंडले पुरुषकर्मविपाकोद्देशः 21a; अथ प्रायश्चित्तलक्षणं 22a; इति श्रीमद्धिरचिते सारग्राहे कर्मविपाके प्रायश्चित्ताधिकारः 54a; इति सारग्राहे कर्मविपाके ° चांद्रायणविधिनिर्णयः 58a; इति श्रीमद्धिर[चिते कर्म]विपाके ऐहिककर्मप्रायश्चित्तानि 63b; इति सर्वशास्त्रसारग्राहे(!) कर्मविपाके सद्धिरचिते प्रायश्चित्तग्रहणे प्रायश्चित्ताधिकारः ॥ अथ दानप्रशंसा । 75a; इति दानसंकल्पप्रयोगविधिः 93b; इति श्रीमद्धिरचिते कर्मविपाके सारग्राहे प्रतिकरणव्यवस्थाकरणं 102a, etc. It ends:

वदनं प्रसाद[सद]नं सदयं हृदयं सुधामुचो वाचः ।
करणं परोपकरणं येषां केषां न ते वंद्याः ॥

इति सारग्राहो नाम वृद्धकर्मविपाकः समाप्तः ॥ समाप्तं चेदं कर्मविपाकनाम धर्मशास्त्रं ॥ संवत् १५ आषाढादि ९० वर्षे अश्विनशुदि १ दिने ऽलेपि ॥

One of the Bombay MSS., which will be described in Prof. Bhandarkar's next Report, here adds the following verses kindly placed by him at my disposal: अथ समयः ॥

आदौ बभूव भुवि विक्रमभानुनामा
भूवल्लभान्यनृपसिद्धशिरोललाम ।
तत्प्राज्यराज्यसमयातिगतांतरिक्ष-
वेदान्विताब्धिविभुसंख्यशरच्छतेषु (*Saṃv.* 1440) ॥
शाके रसोत्तरशतेषु गतेषु राम-
क्षोणीमितेषु (*Śaka* 1306) दयितेषु सहायिनेषु ।
मास्यर्कतापविषमे किल शुक्लनाम्नि
रक्षोशरश्मिरमणीयचलक्षपक्षे ॥
तिथौ स्कंदाक्षिसंख्ये च भ्राजद्राजात्मजाहनि ।
शुभ ऋक्षे विशाखाख्ये योगे सति शिवाह्वये ॥
सुरपतिपुरधृतमुद्रे समुद्रे सकलकलाचंद्रे ।
श्रीनंदपत्तनगरे(!) पुण्यचयैरुल्लसद्भद्रे ॥
श्रीमन्मंगलभूमिपालतनये श्रीदुर्गसिंहे नृपे
राज्यं शासति शाश्वतं विजयिनि क्षोणींद्रतां तन्वति ।
तत्साचिव्यधुरंधरे सुचतुरे मन्त्रीश्वरे दातरि
व्यापारान्परिशीलयत्यनुदिनं श्रीकर्णसिंहे सति ॥
मन्येवं(l. मयैवं) सौम्यसमये विपाकः पूर्वकर्मणां ।
सारग्राहाभिधः श्रेष्ठस्तेनेवायं समुद्धृतः ॥
यादृग्ग्रंथेषु मे दृष्टं तत्तथैवोद्धृतं मया ।
सुसंबद्धमसंबद्धं प्रसीदंत्वत्र सूरयः ॥

Cp. Bhandarkar, Report, 1882-3, p. 63, and Cat. of Deccan Coll., p. 251 (where the work is called *Sārasaṃgraha*, as at fol. 5b of the present MSS.); Cat., p. 139 (*Sārasaṃgrāhaka*).

[GAIKAWAR.]

1768.

84a. Foll. 109; size $10\frac{3}{4}$ in. by $4\frac{3}{4}$ in.; legibly written, in Devanāgarī, in 1770 A.D.; fourteen lines in a page.

Karmavipāka, another work on expiatory rites to be performed with the view of averting evil influences, by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha.*

It begins:

दिवाकरपदद्वंद्वं फलद्वंद्वप्रदायकं ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहं ॥ १ ॥

See Aufrecht, Cat. Bodl., no. 659 (transcribed from the present MS.), where a list of authorities is given.

It ends: शीतज्वरनाशे गुडूचीसमिधः । कन्यार्थं मध्वक्ता लाजाः ॥ इति त्वरितरुद्रप्रयोगः ॥

इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ कर्मविपाकः समाप्तः ॥

Regarding the author, see above, no. 1464.

[H. T. COLEBROOKE.]

1769.

2700. Foll. 417, two of which (375 and 376) are wanting; size $9\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; legibly written, in Devanāgarī; seven lines in a page.

Vidhānamālā, a treatise on ceremonies to be performed with a view to averting evil influences, by *Nṛisiṃha Bhaṭṭa*.

It begins:

प्रणम्य लंबोदरमुत्तमानां संतोषदं सर्वपुराणदृष्टं ।
धर्मार्थकामव्यवहारसिद्धै करोमि शुद्धार्थविधानमालां॥१॥

तत्रादौ पुष्पवतीविधानं निरूप्यते । प्रथमतो दृश्यमानं रजः साध्वसाध्विति विविच्य साधुन[:] प्रतीकारः कथ्यते । °

इति ० प्रथमर्तौ रजोजोषहरविधानं fol. 4b; ० विकृतिप्रसवजनितविघ्ननाशनविधानं 6b; ० यामलोत्पत्तिविधानं 8a, etc.; ० नवग्रहपीडाशमनविधानं 20b; ० वायसग्रहविधानं 21a; ० हस्तिपादग्रहपीडाशांतिविधानं 22b; ० कर्णग्रहपीडाशमनविधानं 23a, etc.;--० विवाहव्रतबंधेषु मातृरजोदोपजनितविघ्नहरविधानं । अथ पुण्याहवाचनं 411a.

It ends: इति स्वस्तिवाचनं ॥ इति श्रीविधानमालायां श्रीमन्नृसिंहभट्टविरचितायां सर्वकामसिद्धिदं स्वस्तिवाचनाख्यं नाम विधानं २३९ ॥

प्रकरणानि द्विशतचत्वारिंशत्फलश्रुतिसहितं ॥

समाहृतमिदं शास्त्रं सर्वशास्त्रार्थसंग्रहात् ।
विधानमालिकाख्यं हि प्राणिनामुपकारकं ॥ १ ॥
धर्मार्थकामशास्त्रेभ्यः संगृह्यालंकृतं मया ।
उद्धृतं सर्वपुष्पेभ्यो यत्नात्स्यान्मधुमक्षिकं ॥ २ ॥
ग्रंथस्यास्यानुरागेण मयानुग्रहणेन वा ।
संतोषयंतु विद्वांसः सचेतांसि (l. स्व ०) समंजसा ॥ ३ ॥
वैराटे विषये ऽस्ति चंदनगिरेर्गव्यूतिमात्रे पुरं
देव्याः प्राक् सुमनोहरं वसुमतीतीरे ऽग्रहारो महान् ।
तत्रत्यो ऽत्रिकुलोद्भवो गुणनिधिः श्रीमान्नृसिंहो द्विजश्
चक्रे शास्त्रमिदं नृणामुपकृतिं संधाय चित्ते निजे ॥ ४ ॥
विधानमालां ग्रथितां मयात्र
गुणानुसंधानविराजमानं ।
प्रमेयसारैः सुभगां पवित्रीं
कुर्वंतु कंठेषु निजेषु धीराः ॥ ५ ॥

इति श्रीनृसिंहभट्टविरचिता विधानमाला समाप्ता ॥ संवत् १७३२ समयनामकार्त्तिकसुदि ९ शनैश्वर समाप्त ॥

[MACK. COLL.]

1770.

921. Foll. 192; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; legibly written, in Devanāgarī, about the middle of last century; ten lines in a page.

A commentary on the preceding work (? by *Viśvanātha*, son of *Hari*). It begins:

यो धान्वंतरशास्त्रमर्थचतुरः कारुण्यरत्नाकर-
सौजन्यामृतपूर्णमानसलसच्छ्रीशंभुचित्तः सदा ।
भूपालालिकलालनीयचरणद्वंद्वस्य सूनुर्हरेर्
भूविस्तारियशाः सदा जयति स श्रीविश्वनाथः सुधीः॥१॥
प्रणम्य लंबोदरम् ० २ ॥

विधानमालेति ग्रंथं नामधेयं तच्चान्वर्थं विधानानां मालेव मालापरंपरेत्यर्थः । विधानं विधिः । ०

The commentary is not quite complete.

It ends: इति श्रीविधानमालायां पितामहस्मृत्युक्तं सर्वदिव्येषु धर्मवाहनधर्मचारिकाविधानं संपूर्णं । this section (236) ends at fol. 402b of the preceding MS.

[H. T. COLEBROOKE.]

1771.

1745a. Foll. 40; size $8\frac{1}{2}$ in. by $3\frac{3}{4}$ in.; good, old Devanāgarī handwriting; eleven lines in a page.

Lakshahoma-paddhati, a manual for the performance of the *Lakshahoma*, for the propitiation of the various planetary agencies, by *Kāśī Dīkshita*, son of *Sadāśiva Dīkshita*.

It begins: अथ लक्षहोमपद्धतिः ॥ तत्र तावत् नानादेवतोद्देशेन वक्ष्यमाणनानामंत्रैः सर्वपापक्षयार्थं परमसुखप्राप्त्यर्थं क्रियमाणस्त्वेक[: ।] उक्तं च बृहत्पाराशरेण ॥

अथातः संप्रवक्ष्यामि द्विजेंद्राः श्रूयतामिदं ।
लक्षहोमविधिं पुण्यं कोटिहोमविधिं तथा॥० 22 *ślokas*

इति बृहत्पाराशरे शांत्यध्याये लक्षहोमविधिः ॥ प्रायश्चित्तार्थं गायत्र्या लक्षहोमः कार्यः । गायत्र्या तिलहोमसहस्रे चैकः प्राजापत्य इति । ०

अथ पुण्याहवाचनं ० मातृकापूजा fol. 6a; इति नांदीश्राद्धं । अथ वरणं 9a; इति ऋत्विग्वरणं । ततो वास्तुपूजनं 10a; अथ अग्निध्यानं 22b, etc.

It ends: सर्वान्कामानवाप्नोति स्वर्गे लोके महीयत इत्यादि प्रागेव लिखितं ॥ इति लक्षहोमपद्धतिः समाप्तं ॥ इति श्रीयाज्ञिकसदाशिवदीक्षितसुतकाशीदीक्षितकृता लक्षहोमपद्धतिः समाप्ता ॥

[H. T. COLEBROOKE.]

1772.

2016. Foll. 6; size 9 in. by $3\frac{3}{4}$ in.; fairly written, in Devanāgarī; nine lines in a page; worm-eaten and injured by wear.

[*Yati-*] *Ārādhanaprayoga*, a manual of rules and formulas for the propitiation of ascetics.

It begins: अथ यतीनां समाराधनप्रयोगः ॥ स च पार्वणश्राद्धानंतरं श्वः स––– स चैवं ॥ कृतनित्यक्रियः मध्याह्ने षोडशाष्टौ चतुरो वा ब्राह्मणानाहूय कर्ता––– राचम्य पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य श्रीनारायणप्रीत्यर्थं ब्रह्मीभूत––रोः आराधनं करिष्ये॥ तदंगेक्षणं पाद्यं च करिष्ये॥° The *mantras* are accented.

Fol. 5*b*: अनेन ब्रह्मीभूतस्य गुरोः आराधनाख्येन कर्मणा तेन श्रीनारायणः प्रीयतां न मम ॥ ततः सुहृद्युक्तो भुंजीतेति ॥ यतीनां पुण्यतिथिसमाराधनप्रयोगः ॥ ततः प्राप्तदशमीमहालयतीर्थप्रयुक्तादिश्राद्धानि कुर्यात् ॥ ° ४ lines ॥ वसिष्ठः ॥

चतुर्विधानां भिक्षूणां जातिवंधुसुतादिभिः ।
एकादशे हि(? ऽह्नि) कर्तव्यं श्राद्धं तेषां तु पार्वणं ॥

इति आराधनप्रयोगः समाप्तः ॥ शके १७१९ पिंगलनामसंवत्सरे कार्त्तिकशुद्धपौर्णमा मंदवासरे इदं पुस्तकं नेनोपनामेन गणेशात्मकप्रभाकरेण लिखितं ॥

On the front and back pages the treatise is called "*Yatīnām puṇyatithisamārādhanaprayoga.*" [DR. JOHN TAYLOR.]

1773.

1217b. Foll. 6; size 11½ in. by 5 in.; fairly written, in Devanāgarī, about 1700 A.D.; fourteen lines in a page.

Dānaphalavrata, a description of a ceremony to be performed, it seems, by unhappy wives who have become estranged from their husbands—like *Kuntī* (also called *Kusumāvatī* or *Pushpāvatī*) and *Damayantī*—or are in fear of losing their sons, like *Sumitrā*.

The names of these personages occur in a tale given (on the last three pages) in illustration of the preceding description, and ascribed to the *Padmapurāṇa*.

It begins: अथ दानाफलव्रतं (! thus always) ॥
संलिप्य गोमये भूमिं चतुरस्र[क]मंडलं(° लां) ।
तन्मध्ये ऽष्टदलं पद्मं शोभितं कर्णिकान्वितं ॥ १ ॥

प्राणायामत्रयं कृत्वा संकल्पं तु ततः परं ।
कलशं शंखपूजां च ततः पूजां समारभेत् ॥ २ ॥

तद्दक्षिणभागे त्रिकोणमंडलं कुर्यात् । तन्मध्ये गणपतिं पूजयेत् । ततो द्वारपूजा । पूर्वद्वारे वक्रतुंडाय नमः । एकदंष्ट्राय° दक्षिणे महोदराय नमः । गजाय· पश्चिमे लंबोदराय । विकटाय· उत्तरे । विघ्नराजाय · धूम्रवर्णाय · अग्रे वास्तुपुरुषाय । ऊर्ध्वभागे भारत्यै । अधोभागे रत्यै । मध्ये गणपतये ।

अत्रागच्छ गणाधीश इह स्थाने च याम्यहं ।
यावत्वां पूजयिष्यामि तावत्वां [सु]स्थिरो भव ॥ १ ॥

चतुर्भुजं महाकायं गजवक्त्रं सुदंतकं ।
शूर्पकर्णं त्रिनयनं ध्यायेत्सर्वार्थसिद्धये ॥ २ ॥

ध्यानं गणपतये° आवाहनं । एकदंताय · आसनं । गजवक्त्राय · पाद्यं । ° –– ॥ अथारुणपूजा । ° ––

अथ महालक्ष्मीपूजा fol. 1*b*; अथ तुलसीपूजा 2*a*; अथ सूर्यपूजा 2*b*; अथांगपूजा 3*a*; अथ पुष्पपूजा 3*b*; अथ अष्टोत्तरपूजा 4*a*; इति पूजाविधिः 115*a*.

Fol. 5*b*: अथ कथा ॥ ऋषय ऊचुः ॥

पितुर्गृहे वर्तमानं कुंती व्यासं ददर्श ह ।
नमः कृत्वा तु सद्भक्त्या पाद्यार्घाचमनादिकं ॥ १ ॥

दत्त्वा संप्रार्थितं व्यासं कुंती मुकुलितांजलिः ।
पतिपुत्राय(? त्र)मोक्षार्थं व्रतं ब्रूहि महामुने ॥ २ ॥

व्यास उवाच ॥

शृणु दानाफलं नाम व्रते(? व्रतं) सर्वव्रतोत्तमं ।
कैलासशिखरे रम्ये पार्वतीपरमेश्वरौ ॥ ३ ॥

व्रतानां सर्वदानानामुत्तमं ब्रूहि तद्व्रतं (! some omission) ॥

श्रीशंकर उवाच ॥

साधु देवि त्वया पृष्टमुत्तमं सर्वतः शृणु ।
भूमौ तु भारते वर्षे पुण्ये च यमुनातटे ॥ ४ ॥ ° १२ ॥

स्त्रिय ऊचुः ॥

पुण्यव्रतमिदं देवि सौरं पापप्रणाशनं ।
सर्वसंपत्करं नृणां पतिपुत्राय(? त्र)मोक्षदं ॥ १३ ॥ °

It ends:

तदा व्रतं कृतं सर्वं भूमौ दानाफलं(!) महत् ।
सुपुत्रांल्लभते कुंती त्वं कुरु व्रतमुत्तमं ॥

ये पठंतीदमाख्यानं शृण्वंति [प्र]श्रयान्विताः ।
सर्वपापविनिर्मुक्ताः यास्यंति परमां गतिं ॥ ५७ ॥

इति श्रीपद्मपुराणे उमामहेश्वरसंवादे दानाफलव्रतं ॥

[H. T. COLEBROOKE.]

1774.

2129. Foll. 2; size 9¼ in. by 4¼ in.; fairly written, in Devanāgarī, about the middle of the last century; thirteen lines in a page.

Sahagamanavidhi, or *Satīvidhāna*, a short treatise (in 66 *ślokas*) on the rite of *Satī*, by *Govindarāja* (?). Rather incorrect.

It begins: श्रीकृष्ण उवाच ॥

अथान्यात्(?अधुना) संप्रवक्ष्यामि नारीणां परमो विधिः [(l. °मं विधिं) ।
भर्त्रा वैव(?सहैव) मरणं स्त्रीणां चैव प्रशस्यते ॥ १ ॥
गच्छते सत्यलोकं तु संयुक्ता पतिना(!) सती ।
सर्वदेवमयो यस्मात् सर्वतीर्थमयः पतिः ॥ २ ॥
नदीनां च यथा गंगा सुराणां च यथा हरिः ।
मुनीनां च परं ब्रह्म स्त्रीणां चैव तथा पतिः ॥ ३ ॥

It ends:

उत्तमा मध्यमा लोका ये वान्ये तत्र संस्थिताः ।
ते सर्वे हरिमुच्चर्ये करतालीं प्रदापयेत्(!) ॥ ६६ ॥

इति श्रीगोविंदपराज(!)विरचितसहगमनविधिः ॥ After which is added, by a different hand, सतीविधानं। Outside it is called संगमनविधि.

Perhaps it is an extract from a *Purāṇa* or some other work. [GAIKAWAR.]

1775.

1705b. Foll. 13; size 8 in. by 4 in.; clearly written, in Devanāgarī; ten lines in a page.

Nīlodvāhapaddhati, a manual for performing the ceremony of letting loose a bull, in connection with funeral rites.

It begins: अथ नीलोत्सर्गकाला उच्यंते ॥

ग्रहणद्वितये पुंये(*r.* पुण्ये) तीर्थे चैवायनद्वये ।
विषुवद्वितये श्राद्धे मृताहेष्वष्टकासु च ॥ १ ॥

इति सूत्रकाराणां वाक्यं। यथा। कार्त्तिक्यां फाल्गुन्यां वैशाख्यां माघ्यां आश्वयुजि अष्टकासु चंद्रसूर्यग्रहणयोर्विषुवति उदगयने दक्षिणायने प्रेतस्यैकादशाहे इति कालाः ॥ तथा मत्स्यपुराणात् । आश्वयुज्यामषाढ्यां चैत्रवैशाखयोरपि । ०

It ends: अथ शांतिकोपहाराः ॥ इति श्रीनीलोद्वाहपद्धतिः समाप्ता ॥ संवत् १६४८ वर्षे माघवदि ७ भौमे लिखितं ॥ [H. T. COLEBROOKE.]

1776.

2938. Fol. 1; size 10¾ in. by 5½ in.; good, modern Devanāgarī; 20 lines in all.

Hitasūtra, a string of 65 rules of conduct and moral maxims, prepared, for Ballantyne, by *Veṅkaṭ-rām*, on 10th July, 1860.

It begins: ओं धर्मोपादानं संतोषः श्रेष्ठः १ ॥ अशीलस्याचारो न भ्राजते २ ॥ क्षेमवतो नाल्पे दोषे नाशो ऽस्ति ३ ॥ शाम्येत्पापं शीलं यो ऽधिगच्छेत् ४॥ वामाचारः पितुरप्यनिष्टः ५॥ आचार्यैस्साम्यं कुर्वीत ६ ॥ मानित्वं मूर्खाणां मिथ्याचारः ७ ॥ ०

The sentences are divided into seven adhyāyas; viz. five of 10 each, and the last two of 9 and 6 resp. [J. R. BALLANTYNE.]

1777.

2316A. Foll. 65; size 13¼ in. by 4¾ in.; good Devanāgarī writing, of 1809 A.D.; nine lines in a page.

Gotrapravaramañjarī, an exposition of the genealogies of the several *gotras*, and of the rules by which intermarriage is forbidden on account of community of ancestors invoked in the *pravara*, or invocation to *Agni*; by *Purushottama Paṇḍita*. It begins:

यज्ज्ञं यत्स्थं यदीयं जगदिदमखिलं यन्मयं यत्प्रधानं
यत्प्रेर्यं यन्निवासं स्थिरचरहृदयं यत्पुरा संप्रभूतं ।
यत्क्रीडावस्तुभूतं यदनुभवसुखं यत्स्वरूपानभिज्ञं
यत्स्वापं यत्प्रबोधं यदतिहिततमं ब्रह्म तस्मै नमोऽस्तु॥१॥
आचार्यान्वेदकल्पान्परिहितनिरतान् कल्पसूत्रप्रणेतॄन्
सर्वान्बोधायनादीन् प्रणिपतितजनत्राणशीलान् प्रणतत्सूत्रोपात्तगोत्रप्रवरसुमनसां मंजरीं तां करिष्ये [म्य ।
यज्ज्ञानात्कर्मकांडं फलति निजफलं ज्ञानकांडं च सर्वं॥२॥
मत्स्यं कूर्मवराहखंजनृहरीन् रामांश्च रामानुजान्
नत्वा द्वादश कल्किविष्णुसहितान् ब्रह्मावतारानिमान्
तत्तत्माक्त(l. प्रोक्त)पुराणभारतगताः स्मृत्यंतरोक्ताश्च ये
तैर्गोत्रैः प्रवरैश्च पूर्वगदितो बध्नाम्यहं मंजरीं ॥ ३ ॥

Under each of the eight *gotras*, the corresponding passages are generally quoted from *Baudhāyana*, *Āpastamba* and *Satyāshāḍhin*, *Kātyāyana* and *Laugākshi*, *Āśvalāyana* and the *Matsyapurāṇa*. This chapter ends fol. 52*a*, after which follow some chapters treating of intermarriage, and expiations of irregularities committed in this respect.

इति क्षत्रियवैश्यप्रवरकांडद्वयं fol. 53*b*; ० असंप्रज्ञातबंधूनां गोत्रप्रवरकांडं fol. 54*a*; ० गोत्रप्रवरतत्त्वज्ञानमाहात्म्यप्रतिपादनपरं सूत्रकांडं fol. 55*a*; ० मातृगोत्रविवाहप्रतिषेधयुक्तिकांडं fol. 57*a*; ० सार्ववर्णिकप्रवरकांडं fol. 58*b*; finally महाप्रवराध्यायपरिसमाप्तिगोत्रप्रवरकांडं ॥

[H. T. Colebrooke.]

1778.

1708. Foll. 60; size 9 in. by 4 in.; fairly good, modern Devanāgarī writing; 9–11 lines in a page.

Gotrapravaramañjarī.

[H. T. Colebrooke.]

1779.

2719. Foll. 30; size 8 in. by 4 in.; good, rather old, Devanāgarī writing; 11–14 lines in a page.

Pravaradīpikā, a similar treatise, by *Kṛishṇa* (*Śaiva*). It begins:

देवस्येशानसूनोः सुरगणमुकुटज्योतिरुद्योतितांघ्रेः
शुंडादंडः करोतु क्रकचविकसयन् श्यामलो मंगलं वः।
दंतो यस्यैकदेशे विकसितविपुलस्फाटिकस्तंभकांतिः
प्राप्तब्रह्मांडकोटौ हरिचरण इव व्योमगंगाप्रवाहः ॥ १ ॥

स शिवः पातु वो नित्यं यत्प्रपंचमहोदधौ ।
उत्पद्यंते विलीयंते ब्रह्माद्या बुद्बुदा इव ॥ २ ॥

महालक्ष्मीं महामायां स्वकुलस्यैव देवता(०तां) ।
यस्याः स्मरणमात्रेण वाग्विलासो भवेद्ध्रुवं ॥ ३ ॥

परंपरात्मकं वंदे श्रीरामचरणांबुजं ।
यं नत्वा विवृणोत्कृष्णः(*r*. व्य०) प्रवरान् मुनिभाषितान् ॥४॥
मुनीनां नाम गोत्राणि वंशावतरणं तथा ।
प्रवराणां तथा साम्यमसाम्यं विस्तरादहं ॥ ५ ॥

The *gotra*-lists end fol. 13*b*: इति प्रवरदीपिकायां कृष्णशैवविवृतौ अगस्त्याष्टगणानां सप्तमुनीनां प्रवरविवरणं समाप्तं ॥

Then follow rules concerning intermarriage, compiled from various authorities, among which may be mentioned: *Kārikā*, fol. 23*b*; *Caturviṃśatimata*, 15*a*, 20*a*; *Pravaradīpa*, 26*a*; *Pravarapradīpa*, 17*b*; *Pravaravivaraṇa*, 23*a*; *Mañjarīkāra*, 17*b*, 28*a*; *Maṇḍana*, 22*b*; *Śrāddhakalpa*, 21*b*; *Śrībhaṭṭapādāḥ*, 28*a*; *Shaṭtriṃśanmata*, 20*a*; *Smṛiticandrikā*, 15*a*; *Smṛitimañjarī*, 14*b*; *Smṛityarthasāra*, 14*a*.

For another MS. of this work (anonymous), see Rāj. Mitra, Bikāner Cat., p. 434.

[Mack. Coll.]

1780.

2316B. Foll. 23; size 13 in. by 4¾ in.; fair, modern Devanāgarī writing; nine lines in a page.

Gotrapravara-darpaṇa (or *-nirṇaya*), another treatise on the same subject, by *Kamalākara Bhaṭṭa*, son of *Rāmakṛishṇa*, and grandson of *Nārāyaṇa*.

In the arrangement of the matter the author follows the *Pravaramañjarī*, which is much quoted by him.

The treatise begins:

नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरसंज्ञेन गोत्रप्रवरनिर्णयः ॥
क्रियते विदुषां प्रीत्यै ग्रन्थानालोच्य सर्वशः ।

तत्र सगोत्राय दुहितरं न प्रयच्छेत् । असमानप्रवरैर्विवाह इत्यापस्तम्बगौतमाचार्यैः सगोत्रा सप्रवरा च निषिद्धा । तत्र सगोत्रस्वरूपमाह प्रवरमञ्जर्यां बौधायनः । ०

The author wrote his *Nirṇayasindhu* in 1611-12 A.D.

[H. T. Colebrooke.]

1781.

1572d. Foll. 24; size $10\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; fair Devanāgarī writing, of 1687 A.D.; eleven lines in a page.

Gotrapravaranirṇaya, another treatise on the same subject, by *Bhaṭṭa Raghunātha* (c. 1620 A.D.), son of *Bhaṭṭa Mādhava,* and grandson of *Bhaṭṭa Rāmeśa.*

It begins:

नत्वा गणेशं श्रीरामं सीतां लक्ष्मीं गुरूनपि ।
विश्वेश्वरं भैरवं च रघुनाथेन धीमता ॥
गोत्रप्रवरनिर्णीतिः समासेन वितन्यते ।
तद्भावे सति गोत्रादिपरिणीतिप्रसक्तितः ॥

It ends:

भट्टरामेशविंद्रम्य[elsewhere ° रामेशसूर्यम्य-]सुत-[माधवसूनुना ।
भूतो ऽयं रघुनाथेन गोत्रप्रवरनिर्णयः ॥

इति श्रीमत्पदवाक्यप्रमाणनिपुणतमभट्टमाधवात्मजभट्टरघुनाथकृतो गोत्रप्रवरनिर्णयः समाप्तः ॥

[H. T. COLEBROOKE.]

1782.

3200. Foll. 17; size 8 in. by $6\frac{1}{4}$ in.; excellent Devanāgarī writing; eleven lines in a page.

Pravaranirṇaya, by *Viśvanātha Deva,* son of *Śambhu Deva,* and younger brother of *Rāma Deva.*

It begins: ओं नमः श्रीजानकीजानये । नमो ब्रह्मणे । नमो महेशाय । नमो गणपतये । नम ऽआपस्तंबाश्वलायनबौधायनकात्यायनेभ्यः ॥ अथातो यज्ञश्राद्धमहादानपरिणयनाद्युपयुक्तं गोत्रप्रवरनिर्णयं व्याख्यास्यामः । तदेतद्ब्राह्मणं भवत्यार्षेयं प्रवृणीत ऽऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीत ऽइति बंधोरेव नैत्यथो संतत्या इति चैकं वृणीते द्वौ वृणीते त्रीणि(*r.* त्रीन्) वृणीते न चतुरो वृणीते पंच वृणीते °

Iti Bhṛiguvaṃśapravaranirṇayaḥ, fol. 4*b*; *Aṅgirovaṃśa,* 9*b*; *Atrivaṃśa,* 11*a*; *Viśvāmitravaṃśa,* 12*b*; *Kaśyapavaṃśa,* 14*b*; *Vasishṭhavaṃśa,* 16*a*; *Agastivaṃśa,* 17*a*; then follow the *Kshatriya-* and *Vaiśya-pravarāḥ.*

It ends: द्व्यामुष्यायणानां प्रथममुत्पादकप्रवरोच्चारणमनंतरं परिगृहीतप्रवर[ो]च्चारणमिति कात्यायनाश्वला[यना]दयः ॥ इति श्रीमच्छंभुदेवतनयरामदेवानुजश्रीविश्वनाथदेवविरचिते वर्णत्रयाणां प्रवरनिर्णयाः समाप्ताः ॥

The fly-leaf contains the following note:

Copied for me from a manuscript belonging to *Narasimhabhaṭ Grāmōpādhyāya* of Belgaum. The manuscript is not dated. It consists of 27 leaves about 9 in. long by $4\frac{3}{8}$ in. broad. The characters are Nāgarī. Presented to the India Office Library. 23rd August, 1878. [J. F. FLEET, Bo. C. S.]

E. TREATISES ON WORSHIP (DEVAPŪJĀ).

1783.

1269. Foll. 68; size 7 in. by $3\frac{3}{8}$ in.; fairly written, in Devanāgarī, in A.D. 1665; ten lines in a page.

Rudrapaddhati, a manual of directions and formulas for the performance of ceremonies to *Rudra,* in connection with the *Śrauta* ritual of the *Taittirīyas,* by *Nārāyaṇa Bhaṭṭa,* son of *Rāmeśvara Bhaṭṭa.*

It begins:

भट्टरामेश्वरसुतो भट्टनारायणः कृती ।
प्रणम्य रामं तनुते रुद्रानुष्ठानपद्धतिं ॥

तत्र तावद् यद्यप्यनेकासु यजुःशाखासु रुद्रः पठ्यते तथापि तैत्तिरीयशाखानुसारेण रुद्रप्रयोग उच्यते ॥ स्मार्तरुद्रप्रयोगस्य बौधायनसूत्रमूलकत्वेन बह्वृचादीनां च तत्र बौधायनं ग्राह्यं । बह्वृचादिभिर्देशवाक्यानुसारेण बौधायनीयानुरोधित्वादिति। इह च रुद्रानुष्ठाने त्रैवर्णिकानामेवाधिकारो न स्त्रीशूद्रानुपनीतानां ॥ तेषां वैदिकमंत्रयुक्तकर्मण्यध्ययनाद्यभावेन साक्षाद्वचनाभावेनाधिकारादिति ॥ अन्यत्र चैतद्विस्तरेण निर्णीतं ॥ तत्र रुद्रः पंचधा । रूपं । रुद्री । लघुरुद्रो महारुद्रो ऽतिरुद्रश्चेति । एकादश गुणवृद्ध्या । सर्वश्च त्रेधा । जपरुद्रो होमरुद्रो ऽभिषेकरुद्रश्चेति । जपरुद्रो ऽपि द्वेधा । केवलजपात्मको होमात्मकश्चेति। होमाभिषेकयोस्तु केवलतदात्मकमेव। तत्र तावदक्षयकामः

श्रीरुद्रप्रीतिकामो वा उत्तरायणादौ° प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य ममकायिकादिसर्वपापक्षयार्थं श्रीरुद्रप्रीत्यर्थं वामुकरुद्रमहं करिष्य इति संकल्पयेत् । पुत्रकामस्तु दीर्घायुःसुपुत्रसिद्ध्यर्थं महारुद्रमहं करिष्य इति । °

ततो वास्तुपूजनं fol. 14*b*;--इति (रुद्र)होमप्रकारसंक्षेपः 53*a*; ततो वसोर्धारा fol. 58*a*; this is followed by the accented text of *Taitt. Saṃh.* V. 4, 8, followed by a figured *stotra*, इह स्वैश्वानराय प्रदिशो ज्योतिर्बृहत् preceded and followed by a number of *stobhas*. Then follow the *'śreyaḥsampādana'* on the part of tho priests to the sacrificer, and the bestowing of *'dakshiṇās'* by the latter.

It ends: दीना[न]नाथांश्वान्नादिना संतोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः संतुष्टो हविष्यं भुंजीतेति ॥ इति श्रीरामेश्वरभट्टात्मजनारायणभट्टसूरिणा काश्यां कर्मसज्ज्ञानतुष्ट्यै रुद्रानुष्ठानपद्धती रचिता समाप्तिमगमत् ॥ ° ॥ अथ रामेश्वरभट्टसूतनारायणभट्टोक्ता होमसंख्या ॥ तद्यथा । लघुरुद्रे अष्टाचत्वारिंशत्पक्षे दशांशेन °

Then follow computations of the number of *homas* to the several *Rudras* to be performed in a year, and the measures of the respective *kuṇḍa* to be used.

The opinion of *Rūpanārāyaṇa* is several times reforred to by the author.

Colophon: इति ° रुद्रपद्धतिः समाप्ता ॥ संवत् १५८७ विश्वावसुनामसंवत्सरे कार्त्तिकवदि ५ तद्दिने जनार्दनपुरग्रामे कोनेरभट्टात्मजनृसिंहेन लिखितं ॥

For another copy of this work, see Rāj. Mitra, Noticcs of S. MSS., I., p. 100.

[H. T. COLEBROOKE.]

1784.

1986. Foll. 17; sizo $8\frac{1}{4}$ in. by 4 in.; fairly written, in Devanāgarī; cight lines in a page.

Rudra-Laghunyāsa, a manual of formulas, intended for certain ceremonies in honour of *Rudra*, or for *Rudra*-worship generally.

It begins: ओम् ॥ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शंशिषद्विश्वे देवाः सूक्तवाचः पृथिवि मातर्मा मा हिंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरो ऽनुमदंतु ॥ ओं शांतिः शांतिः शांतिः ओम् ॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ etc., the whole *Śatarudriya* (*Taitt. S.* IV., 5, 1–11); followed (on foll. 9*b*–14*a*) by *Taitt. S.* IV., 7, 1–11 (cp. no. 152, p. 21 of this catalogue). Down to the end of this section, marked रुद्र in the margin, the *mantras* are accented throughout.

Then follows a second section the leaves of which are marked ल° न्या° (the *Laghunyāsa* proper ?), beginning (without accents):

ओम् । प्रजनने ब्रह्मा तिष्ठतु ॥ पादयोर्विष्णुस्तिष्ठतु ॥ हस्तयोर्हरस्तिष्ठतु ॥ बाह्वोरिंद्रस्तिष्ठतु ॥ जठरे अग्निस्तिष्ठतु ॥ हृदये शिवस्तिष्ठतु ॥ कंठे वसवस्तिष्ठंतु ॥ वक्त्रे सरस्वती तिष्ठतु ॥ नासिकयोर्वायुस्तिष्ठतु ॥ नयनयोः सूर्याचंद्रमसौ तिष्ठेतां ॥ कर्णयोरश्विनौ देवौ तिष्ठेतां ॥ ललाटे रुद्रास्तिष्ठंतु ॥ मूर्ध्न्यादित्यास्तिष्ठंतु ॥ शिरसि महादेवस्तिष्ठतु ॥ शिखायां चामुंडा तिष्ठतु ॥ पृष्ठे पिनाकी तिष्ठतु ॥ पुरतः शूली तिष्ठतु ॥ पार्श्वयोः शिवाशंकरौ तिष्ठेतां ॥ सर्वतो वायुस्तिष्ठतु ॥ ततो बहिः सर्वतो ऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु ॥ सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु ॥ मां रक्षंतु ॥ then accented: अग्निर्मे वाचि श्रितः ॥ वाग्घृदये ॥ हृदयं मयि ॥ अहममृते ॥ अमृतं ब्रह्मणि ॥ वायुर्मे प्राणे श्रितः ॥ प्राणो हृदये ॥ हृदयं मयि ॥ अहं ° ॥ अमृ ° ॥ सूर्यो मे चक्षुषि श्रितः ॥--॥ चंद्रमा मे मनसि श्रितः ॥ ° ॥ दिशो मे श्रोत्रे श्रिताः ॥ ° ॥ आपो मे रेतसि श्रिताः ॥ ° ॥ पृथिवी मे शरीरे श्रिता ॥°॥ ओषधिवनस्पतयो मे लोमनि श्रिताः ॥°॥ इंद्रो मे बले श्रितः ॥ ° ॥ पर्जन्यो मे मूर्ध्नि श्रितः ॥ ° ॥ ईशानो मे मन्यौ श्रितः ॥ ° ॥ आत्मा म आत्मनि श्रितः ॥ ° ॥ पुनर्म आत्मा पुनरायुरागात् ॥ पुनः प्राणः पुनराकूतमागात् ॥ वैश्वानरो रश्मिभिर्वावृधानः ॥ अंतस्तिष्ठत्वमृतस्य गोपाः ॥ then without accents:

अन्यैनं सर्वशरीरं स्पृशेत् ॥ आत्मानं श्रीरुद्ररूपीं ध्यायेत् ॥

शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकं ।
गंगाधरं दशभुजं सर्वाभरणभूषितं ॥
नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनं ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं ॥° 5 more *ślokas*.

आ त्वा वहंतु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिर्वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वों २ ॥

स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकं । [भव ॥
तावत्त्वं प्रीतिभावेन लिंगे(देवे marg.) ऽस्मिन्संनिधौ
निराकारो ऽपि पूर्णो ऽपि निर्गुणो ऽपि निरामया ।
मदनुग्रहमासाद्य भव त्वं भव मूर्तिमान् ॥
शांतो भव ॥ इति लघुन्यासः समाप्तः ॥ ध्यानं ॥
ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं ॥
पद्मासिनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥
शके १७१६ ॥ आनंदनामसंवत्सरे भाद्रपदशुक्लत्रयोदशि इंदुवारश्रवणनक्षत्रप्रातःकाळतद्दिने इदं पुस्तकं रामचंद्रज्योतिषीन लिखितं ॥ विश्वेश्वरसुप्रसंन् ॥ पावसग्रामे न वास्तव्यं(!) ॥ विश्वेश्वरसंनिधं ॥ [DR. JOHN TAYLOR.]

1785.

2232. Foll. 22; size 9½ in. by 4½ in.; fair, modern Devanāgarī writing; 13 or 14 lines in a page.

Rudrabhāshya, a commentary, in 478 couplets, on the *Rudrādhyāya* (or *Śatarudriya*), by *Ahobala* (son of *Nṛisiṃha*), of the *Bhāskara* family (cf. no. 152).

It begins:

विश्वेश्वरं नतसुरासुरमौलिरत्नं
मंदारकुंदकुसुमावृतपादपीठं ।
भस्मावगुंठमहिकंठमुमोपकंठं
सोत्कंठमाश्रय मनः पटु नीलकंठं ॥ १ ॥
चेतोभृंग महेशपादयुगलं यद्विष्णुनेत्रार्चितं
तत्त्वं मौनि मनोमधुव्रततरत्रातार्श्रयं संश्रय ।
तत्पादाब्जमगण्यपुण्यविभवप्राप्यं ततो दुस्त्यजं
मा मा संत्यज मामको यदि तदा तत्रैव नित्यं वस ॥ २ ॥
संसारसागरसमुत्तरणप्रवीणः
श्रीमानहोबलमहाकविराजराजः ।
श्रीरुद्रभाष्यतरिमुज्ज्वलपद्यरूपां
चक्रे सदाशिवकृपासमुपात्तविद्यः ॥ ३ ॥
अहोबलः पूजितकालकालः
श्रीकालकालार्चितनीतकालः ।
श्रीरुद्रभाष्ये ज्वलचित्तमूलो
जयत्ययं शंकरदत्तशीलः ॥ ४ ॥
अहोबलो भास्करवंशभानुः
श्रीरुद्रमंत्रार्थविचारदक्षः ।
श्रीरुद्रभाष्यं तनुते नितांतं
प्रकाशयद्रुद्रमगाधभावं ॥ ५ ॥ ० ८ ॥
ब्रह्मचारिण इत्यादि महोपनिषदि स्फुटः ।
श्रीरुद्राध्यायमहिमा पुराणेषु स्मृतिष्वपि ॥ ९ ॥
श्रीरुद्राध्यायमध्यस्थमेकैकमपि नाम यत् ।
तदनंतमहापापमहावनहुताशनः ॥ १० ॥
न जाने गिरिजाजाने रुद्राध्यायजपात्परं ।
यज्ञपादब्जजादीनां पदं पादतलीकृतं ॥ ११ ॥ ० १२ ॥
सृष्टिपालनसंहाराद्यो भवत्याद्युपाधिमान् ।
करोति स महारुद्रः श्रीरुद्राध्यायदेवता ॥ १३ ॥
तस्य देवादिदेवस्य श्रुतिप्रोक्तं तनुद्वयं ।
तस्यैतेत्यादिवेदेन बोधितं खलु तद्वयं ॥ १४ ॥
तथा चोक्तं ।
तस्यैते तनवो(*r.* तनुवौ) घोरान्या शिवान्येति शिवरहस्ये।
तस्यैते तनवो(*r.* तनुवौ) देवा घोरान्या घोररूपिणी ।
शिवान्या सा यतः(?न्यायतः) साक्षाच्छिवदा शिवरूपिणी
नम इति । [॥ १५ ॥ ० १९ ॥
यागादिभिः समाराध्याधीनत्वात्सप्रसादनं ।
प्रह्वत्वापरपर्यायं नम[:]शब्दार्थमीमहे ॥ २० ॥
ते रुद्र मन्यवे ।
ते सर्ववेदवेदांतप्रतिपाद्यस्य वस्तुनः ।
अमेयानंतकल्याणगुणाभेदसुरूपिणः ॥ २१ ॥
शक्तिक्रोधात्मिका शंभोः शांतिरूपा भवत्वियं ।
मा बाधिष्ट महेशस्य भक्तानिष्टमयीशतां ॥ २२ ॥
हे रुद्र ते तवायं यो मन्युः प्रज्वलनात्मकः ।
क्रोधो ऽनर्थादिमूलो ऽस्ति तादृशाय नमो ऽस्तु नः॥२३॥
रोदयत्यात्मविमुखानिति रुद्रः प्रकीर्तितः ।
रुत्संसाराभिदं(*r.* धं) दुःखं तद्विद्रावयतीति वा॥२४॥०२९॥
अग्रे ऽप्यस्तु नयत्येवमनुषंगो यथोचितं ।
उतो त इषव इति ।
उतो इत्यपि चेतयें ते तवेषुः शरः स्मृतः ॥ ३० ॥
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
सुवर्णोबलरूपाय धन्वने धनुषे नमः ॥ ३१ ॥
बाहुभ्यामुत बाहुभ्यामपि ते तव नो नमः ।
अनंतबाहुविक्षेपो वेदानामप्यगोचरः ॥ ३२ ॥ ० १२५ ॥
शशिपंजराय । शशिपर्णीलतृणां तद्वज्जरः पिंजर इत्ययं ।
शशिपंजरो हरस्तस्मै नमः शशिपंजराय ते ॥ १२६ ॥ ०

It ends:

एकादशो ऽपि पापघ्नो ऽनुवाको विवृतो ऽखिलः ।
अहोबलेन सुधिया शिवसंतुष्टिहेतुना ॥ [४]७२ ॥ ०
व्याख्या श्रीमदहोबलेन रचिता श्रीभास्करीयेण या
श्रीरुद्रस्य मनोहरातिसुगमा संवीक्ष्य भाष्याणि सा ।
श्रीविश्वेशपदारविंदनिरतस्वांतातिसंतोषदा
व्याख्याकल्पलता मनोज्ञफलदा संशीलता(r. ०लिता) [सादरं ॥ [४]७४ ॥ ०
महेश त्वद्वारि(r. चि) स्फुरतु रुचिरा वागतितरां
ममैषा निर्दोषा जय जय महेशेति सततं ।
शिवा सैषा वाणी भवतु शिवदा मह्यमनिशं
महेशानाथं मां शरणद सनाथं कुरु विभो ॥ [४]७८ ॥
इति अहोबलेन विरचितं श्रीरुद्रभाष्यं समाप्तम् ॥

Besides the *Śivarahasya*, which is repeatedly referred to, no other authority is met with.

For the author's commentary on the *Mahimnaḥ Stava* in which the present work is mentioned, see Aufrecht, Cat. Bodl., no. 237.

[R. JOHNSON.]

1786.

353. Foll. 92; size 10 in. by 3⅝ in.; fairly written, in the Devanāgarī character; seven lines in a page.

Rudra-paddhati, a description of mystic rites connected with the worship of *Śiva*, in the form of *Mahārudra*, composed, in Saṃvat 1515 (A.D. 1459), by *Paraśurāma*, son of *Karṇa*.

In its close imitation of the Vedic ceremonial it keeps clear of the indelicacies usually met with in Tantric writings; only passing allusions being made to the existence of a female deity, under the name of *Umā*.

The treatise begins:

श्रीगणेशं गुरुं नत्वा शारदां वरदप्रदां ।
विप्रः परशुरामाख्यः कुरुते रुद्रपद्धतिं ॥ १ ॥
मुक्तिभुक्तिप्रदातारं सोमं सोमार्धधारिणं ।
सदानन्दमयं शान्तं शिवं वन्दे शिवप्रदं ॥ २ ॥
पूर्वाचार्यकृतीर्दृष्ट्वा स्मृतीश्चागमसंमतीः ।
हृद्यैः पद्यैर्मुनीन्द्रोक्तैः क्रियते रुद्रपद्धतिः ॥ ३ ॥
पञ्चाङ्ग[न्य]पितुं रुद्रां(r. रुद्रान्) याजुर्वेद्यान्द्विजन्मनां ।
मन्दधियानां च मुग्धानां प्रबोधाय प्रबोधिनी ॥ ४ ॥ ०

(some 65 *ślokas*); इति जपप्रशंसा fol. 7*a*;

अथ मण्डपकुण्डादिसाधनं यज्ञसिद्धये ।
साधयेत्प्रथमं प्राचीं शङ्कुना वोडुनाथवा ॥ १ ॥

130 *ślokas*; इति ० मंडपकुंडलक्षणं fol. 19*a*;

अथ रुद्रस्य वक्ष्ये ऽहमितिकर्तव्यतां च तां । ०

177 *ślokas*; इति ० कर्तव्यता fol. 34*b*; इति ० देहशुद्धिः fol. 37*b* (33 *ślokas*); इति ० पीठपूजा fol. 48*a* (124 *ślokas*); अथ न्यासविधिरुच्यते ॥

अथाभिधास्ये रुद्राणां शान्तये गृहमेधिनां ।
पञ्चाङ्गानां विधानं तद् यत्कृतं हन्ति पातकं ॥

इति ० न्यासविधिः ॥ fol. 62*b* (178 *ślokas*).

नमस्ते षोडशर्चेन देवतावाहनं स्मृतं । ० (94 *ślokas*).

इति ० आहुतिपात्रलक्षणं । fol. 70*b*; अथ होमविधिः ॥

कृतरुद्रजपस्यान्ते होमं कुर्याद् दशांशतः । ० 220 *śl.*

It ends:

आदौ जपप्रशंसोक्ता ततो मण्डपकुण्डकं ।
इतिकर्तव्यता पश्चाद् देहशुद्धिस्ततः परं ॥
पीठार्चा न्यास आहुत्याः प्रमाणं हवनं ततः ।
एतान्यनुक्रमेणाष्टौ प्रोक्तानि रुद्रपद्धतौ ॥
संवद्विक्रमभूपस्य पञ्चदशशते गते ।
पञ्चदशोत्तरे वर्षे जन्माष्टम्यां प्रकाशिता ॥
उदीच्यजातिविप्रेण कर्णपुत्रेण धीमता ।
कृता परशुरामेण महारुद्रस्य पद्धतिः ॥ २० ॥
इति यदिदमसूक्तं सूक्तमाहोस्विदुक्तं
तदपि मनसि धार्यं द्वेषतो न प्रहार्यं ।
तदपि(r. दधति) मुदमशोका बालकोक्तौ हि लोका
मदुपरि रमणीया मित्रता धारणीया ॥

इति होमविधिः समाप्तः ॥ इति श्रीपरशुरामविरचिता रुद्रपद्धतिः समाप्ता ॥ ० संवत् १६७५ वर्षे मासपौषशुद्धद्वादशीवारशुक्र लिखितं प्राग्गौडज्ञातीयदवे श्रीपरमानंदनमहाकालेश्वरपुरे शुभं॥

[H. T. COLEBROOKE.]

1787.

1635a. Foll. 29; size 9⅜ in. by 4 in.; well written, in Devanāgarī, about the latter part of the 16th century; ten lines in a page.

Rudra-paddhati, a shorter treatise on the same subject as the preceding one, and perhaps inspired by it, as the partial identity of the introduction might seem to indicate.

It begins:

श्रीगणेशं गुरुं नत्वा शारदां च वरप्रदां ।
सर्वेषामुपकारार्थं लिख्यते रुद्रपद्धतिः ॥ १ ॥
भुक्तिमुक्तिप्रदातारं सोमं सोमार्धधारिणं ।
सदानंदमयं शांतं शिवं वंदे शिवप्रदं ॥ २ ॥

आदौ समासतो विनियोगः । तत्र जाबालश्रुतिः । किं जप्येनामृतत्वं गच्छति शतरुद्रियेणेति ॥ तथा रुद्राध्यायी मुच्यते सर्वपापैरिति श्रुतिः ॥ स्मृतिवाक्यैरपि जपहोमादौ शतरुद्रियस्य विनियोगः ॥ तत्र रुद्ररुद्रीमहारुद्रातिरुद्राणां लक्षणान्याह शातातपः । °

Fol. 4*a*: युगानां त्रित्वे(? *r.* त्रित्वे) जाते अष्टाविंशतितमे कलियुगे प्रथमचरणे॥ श्रीमन्नृपतिविक्रमार्कसंवत्सराणां बार्हस्पत्यानुमानेन यथासंख्याधिकषोडशशतमे वर्षे। श्रीमत्शालिवाहनशाकात् संख्याकादधिकपंचदशशतमे वर्षे। अमुकनाम्नि संवत्सरे उत्तराशावलंबितश्रीमन्मार्तंडमंडले । अमुकऋतौ अमुकमासे । पक्षे । तिथौ । वारे । नक्षत्रे । योगे । करणे । अमुकस्थे चंद्रे । सवितरि । देवगुरौ । शेषेषु ग्रहेषु यथास्थाने स्थितेषु सत्सु । एवं गुणविशिष्टे पुण्ये देशे काले च । मम सभार्यस्य सपुत्रस्य क्षेमायुरारोग्यपरमैश्वर्यसुखप्राप्त्यर्थं ° अस्मिन्महारुद्राख्ये कर्मणि आचार्यादिऋत्विजां वरणमधुपर्कस्वस्तिवाचनान्यहं करिष्ये। इति संकल्पं कुर्यात् ॥ °

Fol. 17*a*: इति महारुद्रपद्धतिः ॥ रुद्रविधानं ॥ अथ स्नात्वा सर्वोपद्रवनाशनं । छंदःपुरुषाय नमः । शरीरे न्यसेत् । गौतमभरद्वाजाभ्यां नमो नेत्रयोः । विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः । वसिष्ठभरद्वाजाभ्यां नमो नासिकयोः । अत्रये नमो वाचि । गायत्र्यै छंदसे ऽग्नये नमः शिरसि । °

It ends: विरूप १ विश्वरूप २ पशुपति ३ ऊर्ध्वलिंग ४ ॥ शेष १ तक्षक २ अनंत ३ वासुकी ४ शंखपाल ५ महापद्म ६ कंबल ७ कर्कोटक ८ ॥ इति रुद्रपीठदेवताक्रमः ॥

Acc. to the passage on fol. 4*a* (Saṃvat 16. ., Śāka 15 . .) the treatise seems to have been composed between A.D. 1578 and 1643; the writing of the MS. pointing to somewhere about the former date.

For the same treatise see Weber, Cat. Berl., no. 1283. [H. T. COLEBROOKE.]

1788.

91A. Foll. 52; size 10 in. by 4 in.; fairly written, in Devanāgarī, in the latter part of last century; eleven lines in a page; the last six leaves supplied by a different hand.

Rudrapaddhati, another manual of *Śiva* worship, by *Dīkshitānanta*, son of *Viśvanātha*.

It begins:

नमामि पार्वतीसूनुं भक्तानां सिद्धिदायकं ।
रुद्रकर्मविधातॄणां चतुर्वर्गफलप्रदं ॥ १ ॥
दीक्षितानंतविज्ञेन विश्वनाथस्य सूनुना ।
रच्यते सुखबोधाय रुद्रपद्धतिरादरात् ॥ २ ॥

श्रीकुलदेव्यै नमः ॥

सुमुखश्चैकदंतश्च पि[ङ्ग]लो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ १ ॥
धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ °

It ends: ब्रह्मणे भोजनमयुतहोमात्सहस्रगुणा अन्यत्सर्वं लक्षहोमवत् ॥

इति श्रीमद्यज्ञोपवीताभिधानश्रीविश्वनाथसूनुना दीक्षि]-तानंतेन विर - - - - पका - - - - संग्रहरुद्रानुष्ठानत्रिविधाग्रहमखपद्धतिः ॥

[H. T. COLEBROOKE.]

1789.

1345A. Foll. 27; size 12 in. by 4½ in.; fair, modern Devanāgarī writing; nine lines in a page.

Śiva-Liṅgapratishṭhā, or *Liṅgasthāpanavidhi*, a manual of rites to be performed at the setting up and inauguration of the *Liṅga*, by *Ananta*.

It begins:

अथ लिंगप्रतिष्ठा तत्र मूलवाक्यानि मात्स्ये ।
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥ १ ॥ °

[39 *ślokas;* after which:

इति शिवप्रतिष्ठाकालादिनिर्णयः ।
लक्ष्मीलालितपादाय लावण्यापूर्णसिंधवे ।
नतभक्ताभीष्टदात्रे नमस्ते शेषशायिने ॥ १ ॥
प्रतिष्ठाग्रंथनिचयान् विलोक्यादरमादितः ।
शिवलिंगप्रतिष्ठा श्रीमदनंतेन तन्यते ॥ २ ॥

तत्र तावदुत्तरायणे माघादिपंचमासेषु शुक्लपक्षे चतुर्थीषष्ठ्यष्टमीचतुर्दशीव्यतिरिक्ततिथौ कृष्णपक्षे ऽपि दशम्याः पूर्वमनिषिद्धतिथौ बुधगुरुकाव्यमंदानामन्यतमस्मिन्वारे ऽश्विनीरोहिणीमृगपुनर्वसुपुष्योत्तराहस्तस्वात्यनुराधाज्येष्ठाश्रवणमूलधनिष्ठारेवतीनामन्यतमस्मिन्नक्षत्रे ऽनुपदिष्टे ऽपि स्वदेवत्ये व्यतीपातादिवर्जिते भद्रादिवर्जिते ज्योतिर्विदुक्तग्रहबलवति सुलग्ने शिवादिप्रतिष्ठा कार्या । °

It ends: अग्ने नयेति प्रदक्षिणा त्रिचतुर्वसिहा(?त्रिश्चतुर्वा सिक्ता) ऽग्निम् । विश्वभुजे नमः । सर्वभुजे नमः । आत्मने नमः । परमात्मने नमः । इति नमस्कृत्य लिंगप्रतिष्ठासिद्ध्यर्थं द्वादश ब्राह्मणान् भोजयिष्ये देवं प्रणिपत्य प्रार्थयेत् ।
यावच्चंद्रावनीसूर्यास्तिष्ठंत्यप्रतिघातिताः ।
तावत्त्वयात्र देवेश स्थेयं भक्तानुकंपया ॥

ततो नमस्कारनामकरणं तन्नाम्ना देवस्योत्तरपूजां कृत्वा आचार्याय गां दत्त्वा ब्रह्मणे वृषभं सदस्यायाश्वं ऋत्विग्भ्यो दक्षिणां दत्त्वा पूर्णतां वाचयेत्ततो मंपदेताग्निं(?मंत्रेणाग्निं) विसृजेत् ॥ इति बौधायनसूत्रोक्तलिंगस्थापनविधिः समाप्तः ॥

[H. T. Colebrooke.]

1790.

1988a. Foll. 4; size 7½ in. by 4 in.; clear, modern Devanāgarī writing; eight lines in a page.

Rudrapūjā, or *Mahādevaparicaryāvidhi*, a manual for the daily worship of *Rudra-Mahādeva*, by means of offerings of flowers and the recitation of Vedic *mantras*.

It begins: अथातो महादेवस्याहरहःपरिचर्याविधिं व्याख्यास्यामः ॥ स्नातः शुचिः शुचौ समे देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वाक्षतपुष्पैर्यथालाभमर्चयित्वा सह पुष्पोदकेन महादेवमावाहयेदों भूः पुरुषमावाहयाम्यों भुवः पुरुषमावाहयाम्यों सुवः पुरुषमावाहयाम्यों भूर्भुवःसुवः पुरुषमावाहयाम्यायातु भगवान्महादेव इत्यथ स्वागतेनाभिनंदति स्वागतमनुस्वागतं भगवते महादेवायैतत्स्वासनं कॢप्तमास्तां भगवान्महादेव इत्यत्र कूर्चं ददाति भगवते ऽयं कूर्चो दर्भमयस्त्रिवृद्धरितसुवर्णस्तमुपस्तेत्यत्र स्थानानि कल्पयत्यग्रतो ब्रह्मणे दक्षिणतः स्कंदाय विनायकाय पश्चिमतः स्थूलायोत्तरत उमायै नंदिकेश्वराय स्थानं कल्पयामीति सर्वत्रानुषजत्येवं कल्पयित्वा यो रुद्रो अग्नाविति यजुषा पात्रमभिमंत्र्य °

It ends: भूर्भुवःसुवः पुरुषमुद्वासयामि प्रयातु भगवान्महादेव इति विसर्जयति लिंगस्यानेध्यावाहनोद्वासनवर्जमहरहः स्वस्त्ययनमित्याचक्षत इत्याह भगवान् बौधायनः । पंचदशः ।
प्रयातु भगवानीशः सर्वलोकनमस्कृतः ।
अनया पूजया तुष्टः पुनरागमनाय च ॥

The leaves are marked रु° पू°; and on the outer pages the tract is called बौधायनसूत्रोक्तरुद्रपूजाविधिः ॥ [Dr. John Taylor.]

1791.

1988d. Foll. 8; size 7½ in. by 4 in.; fair, modern Devanāgarī writing; seven lines in a page.

Pārthiva(liṅga)pūjā, a manual for making *liṅgas* of earth, founded on the directions given in the *Baudhāyanasūtra*, the *Bṛihad-Vāsishṭha* and *Laiṅga(purāṇa)*.

It begins: अथ पार्थिवलिंगपूजाप्रकारविधिः ॥ अरण्यतडागनदीतीरादिशुद्धस्थानं अभिलक्ष्योक्तं ।
गत्वा स्थानं नमस्कुर्यान्मंत्रमेतं समुच्चरेत् ।
सर्वाधार धरादेव त्वद्रूपां मृत्तिकामिमां ।
लिंगार्थं तु प्रगृह्णामि प्रसन्नो भव मे प्रभो ॥
इति मंत्रेण मृत्तिका ग्राह्या । मृत्तिकाप्रमाणं ।
यावत्स्यादात्मनः शक्तिर्मृदं तावत्समुद्धरेत् ।
तदर्धं वाथ तस्यार्धं तदर्धं वा तदर्धकं ।
एवं पलद्वयात्न्यूनं न तु कुर्यात्कदाचनेति ॥
शक्त्यनुसारेण मृदमानीय तदुपरि आर्द्रतायै जलं दत्त्वा । ओं सद्योजातं प्रपद्यामीति(!) मंत्रेण मृदं हस्तेन गृहीत्वा °

It ends: यथाशक्ति मूलमंत्रजपं कृत्वा प्रदक्षिणान्नमस्कारान्कृत्वा ओं महादेवाय नम इति विसर्जयेत् । स्त्रीभिः शूद्रैश्च प्रणवरहितः शिवाय नम इत्येव सर्वत्र मंत्रः पठितव्यः ।
नमोऽन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ।
विरक्तानां तु शूद्राणामेवं पूजा विधीयते ॥
इति सूतसंहितावचनात् ॥ इति पार्थिवपूजा समाप्ता ॥

[Dr. John Taylor.]

1792.

1258c. Foll. 82; size 9 in. by 3¾ in.; Devanāgarī character; 7 or 8 lines in a page.

Śivapūjāsaṃgraha, a manual for worshippers of *Śiva*, by *Vallabhendra Sarasvatī*.

Very incorrect.

The MS. begins: ओं भशुंडुः(?भुशुंडः) कालाग्निरुद्रं भस्मस्नानविधिं ब्रूहीति होवाच। अथ प्रणवेन विमृज्य तद्भस्म प्रणवमंत्रितेन तु तेनैव दिग्बंधं कारयेत्पुनरपि तेनास्त्रमंत्रेणांगानि मूर्धादीनि उद्धूलयन् मलस्नानमिदं। अथ विधिस्नानमासाद्य पंचभिर्मंत्रैस्तत्क्रमादुद्धूल्य · ईशानेन शिरोदेशं · मुखं तत्पुरुषेण तु · उरोदेशमघोरेण गुह्यं वामदेवेन · ०

इति श्रीवल्लभेंद्रकृतभस्ममहात्म्यसंग्रहो नाम प्रथमोध्यायः fol. 20*b*; इति० भस्ममहात्म्यसंग्रहे द्वितीयोध्यायः fol. 41*b*; इति वल्लभेंद्रकृतशिवप्रसादमाहात्म्यसंग्रहे चतुर्थोध्यायः fol. 67*a*.

It ends:

यस्तु शंकरनिर्माल्यं पादेनाक्रमते नरः।
षष्टिवर्षसहस्राणि तिर्यग्योनिषु जायते॥

इति वल्लभेंद्रस[र]स्वतीकृ[त]शिवपूजसंग्रहे पंचमोध्यायः॥ संवत् १७२४ नलनामसंवत्सरे दक्षिणायने कार्त्तिककृष्णत्रयोदश्यां शनौ श्रीमत्तुलसीविश्वनाभदत्तनूजेन वि०लेन लिखितो ऽयं ग्रंथः काश्यां ०

[H. T. COLEBROOKE.]

1793.

1965. Foll. 16; size 6½ in. by 4 in.; well written, in Devanāgarī, at the beginning of the present century; European paper; nine lines in a page.

Śivapūjāpaddhati, a manual of *Śiva*-worship, by *Rāghavānandanātha*.

It begins:

श्रीमच्छिवषडर्णस्य नित्यानुष्ठानपद्धतिः।
संक्षेपादुच्यते नत्वा मौलौ श्रीनाथपादुकां॥

तत्र यथाविधि गुरोर्मंत्रदीक्षां लब्ध्वा श्रीशिवमुपासीत। ब्राह्मे मुहूर्ते उत्थाय स्वशिरसि श्रीगुरुं ध्यात्वा। ओं ऐं अमुकानंदनाथामुकी देव्यंबा गुरुश्रीपादुकां पूजयामि नम इति ०

इति ० संध्याविधिः fol. 3*a*; इति भूतशुद्धिः fol. 5*a*; इति मातृकान्यासः। अथ मूलऋष्यादिन्यासः fol. 6*b*; इति करांगन्यासः fol. 7*b*; इति गोलकन्यासः fol. 8*a*; इत्यंतर्यागः। अथ बाह्यपूजा fol. 9*a*; इति प्रथमावरणं fol. 12*b*, etc.; षष्ठावरणं fol. 13*b*.

It ends: अस्य षट्त्रिंशल्लक्षजपात्मकं पुरश्चरणं पायसाज्यसंमिश्रैः षट्त्रिंशत्सहस्रहोमः। शेषं गुरुतः शास्त्रतश्चावगंतव्यं॥

राघवानंदनाथेन रुक्मिणीकांतसेविना।
निर्मितापचितिः शैवी शैवानां सुखसिद्धये॥

इति राघवरचिता श्रीशिवषडक्षरस्य संक्षिप्तपूजापद्धतिः समाप्ता॥

[DR. JOHN TAYLOR.]

1794.

1967B. Foll. 20; size 6½ in. by 3½ in.; fairly written, in Devanāgarī, at the beginning of the present century; nine or ten lines in a page.

Śivapūjāprakāra, another treatise on the same subject.

It begins: ब्राह्मे मुहूर्ते चोत्थाय स्वेष्टदेवतावंदनं कृत्वा बहिर्गत्वा ऽवश्यकादिकं विर्वर्त्य स्नानं कुर्यात्। तच्चोक्तं शिवरहस्ये। ०

इत्यंतःस्नानविधिः। अथ भस्मस्नानं fol. 2*a*; इति भस्मधारणं fol. 3*a*; then follow prayers.

It ends:

शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत्।
शिवो जयति सर्वत्र यः शिवः सो ऽहमेव हि॥

एवं तन्मयो भूत्वा यथासुखं विहरेदिति॥

[DR. JOHN TAYLOR.]

1795.

792. Foll. 28; size 10½ in. by 4 in.; Devanāgarī writing, somewhat difficult to read; 12–14 lines in a page.

Gopālapaddhati, a manual for the worship of *Krishṇa*, (? by *Dinakara*, son of *Nṛisiṃha*).

It begins:

श्रुतिमस्तकरत्नौघभाराजितपदांबुजे ।
व्रजवासिजनानंदे मुकुंदे रमतां मनः ॥ १ ॥
उत्तिष्ठन् शयनाद्ब्राह्मे मुहूर्ते मंत्रिसत्तमः ।
इंद्रनीलमणिश्यामं गोपरूपं हरिं स्मरेत् ॥ २ ॥
प्रातः स्मरामि सुखबोधतनुं तुरीयं
यस्या निरुक्रमपदं पदमिंदिरायाः ।
आमुक्तमुग्धमुनिमाविनि(? r. मानस)तोषबीजं
नंदात्मजं जनिमजस्य जगत्त्रयादेः ॥ ३ ॥
प्रातर्नमामि नमनीयतरं परं यद्
वागीशशंकरशचीपतिभृंगजुष्टं ।
गोगोपगोपललनासुलभं मुरारेः
पादांबुजं निजभयोद्भवनाशगंधि ॥ ४ ॥
प्रातर्नमामि नवनीरजचारुनेत्रं
बिंबाधरोत्तमसुधाकरबिंबवक्त्रं ।
विद्युन्निपीतवसनावृतमेघगात्रं
गोपालमादिपुरुषं वसुदेवपुत्रं ॥ ५ ॥
प्रातर्वैलानुजमजं शयनोपविष्टं
निद्रांतरक्तनयनोत्स्मितगोपिजुष्टं
गोगोपहुंकृतिसुगीतिरवाभितुष्टं
सामैकघुष्टमनुचिंतय चित्तपुष्टं ॥ ६ ॥
प्रातः श्रये यदुवरं वरदं वरेण्यं
वृंदारकैर्नतमनंतसखं सखायं ।
दुःखापहं द्रुपदजाजयसज्जनानाम्
आनंदसिंधुमवधीरितधर्मबाधं ॥ ७ ॥
यः श्लोकपंचकमिदं मनुजो मुरारेः
पादारविंदमकरंदविनिष्ट(r. निविष्ट)चेताः ।
संकीर्तयेदथ शृणोति हरेः प्रगे ऽसौ
भूयात्परावरतनो(? r. धनो) भवतः कृपातः ॥ ८ ॥

इति पठन्नुत्थितो यथावच्छौचाचमनदंतधावनानहृदिन(? हर्दिवं)-द्वादशगंडूषजिह्वोल्लेखनरात्रिवस्त्रपरिवर्तनद्विराचमनानि विधाय शुचिदेशे कंबलाद्यासनं विस्तार्य गायत्र्यभिमंत्रिततोयेन प्रोक्ष्य ओं नमः पद्मासनायेति धेनुमुद्रां प्रदर्श्यासने उपविश्य ।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

इति तर्जन्या भुवं स्पृष्ट्वा ।

अपसर्पंतु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञयेति ॥ ०

It ends: पंचभावनानुसारेण देवं स्वहृदये उद्वास्य पंचांगानि न्यसेदिति सर्वपूजासु समानं ॥

अनावृतनिजानंदगोविंदाश्रमदेशिकैः ।
दर्शितेन यथा किंचित्सूचितं नातिविस्तरं ॥ १ ॥
दिनकृता दशार्णस्य भुक्तिमुक्तिफलावधेः ।
प्रीयतां तेन विश्वात्मा गोपगोपीजनेश्वरः ॥ २ ॥

इत्यर्थं तत्सद्गोपालार्पणमस्तु ॥

गोपालस्य दशार्णस्य पद्धतिर्येन निर्मिता ।
तं कृपालुमहं वंदे नृसिंहं गुरुमीश्वरं ॥ १ ॥

संवत् १६६४ वर्षे पौषमासे लिखितं ॥

[H. T. COLEBROOKE.]

1796.

945b. Foll. 64; size 12 in. by 5 in.; good Devanāgarī writing, of about 1730 A.D.; ten lines in a page.

Bhagavadbhaktivilāsa, a comprehensive work on the religious ceremonies of the *Vaishṇavas*, by *Gopāla Bhaṭṭa*.

This MS. contains only two chapters (*vilāsa*), viz. the 18th (*mūrtiprādurbhāva*) and 19th (प्रातिष्ठिक), but in the colophons these numbers have been altered to 1st and 2nd *vilāsas*.

The work has been published, with a commentary, Calcutta 1845.

[H. T. COLEBROOKE.]

1797.

945a. Foll. 43; size 12 in. by 5 in.; legibly written, in Devanāgarī, about 1770 A.D.; 9 or 10 lines in a page.

Kṛishṇabhaktikalpavallī (also called *Bhaktimañjarī*, or *Haribhaktimañjarī*, at the end of chapters 1 and 2), a work on *Kṛishṇa* worship, in four chapters (*mañjarī*).

It begins: ग्रंथारंभे निर्विघ्नपरिसमाप्तिकामो ग्रंथकारः स्वेष्टदेवतां श्रीकृष्णचंद्रं प्रणमति । ब्रह्मसंहितायां श्रीब्रह्माणं प्रति श्रीशेषदेवप्रणीतेन(!) वचनं जानीते ।

चिंतामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभिरभिपालयंतं ।
लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं
गोविंदमादिपुरुषं तमहं भजामि ॥
वेणुं क्वणंतमरविंददलायताक्षं
बर्हावतंसमसितांबुजसुंदरांगं ।
कंदर्पकोटिकमनीयविशेषशोभं
गोविंदमादिपुरुषं तमहं भजामि ॥ २ ॥
आलोलचंद्रकलसद्वनमाल्यवंशी-
रत्नांगदं प्रणयकेलिकलाविलासं ।
श्यामं त्रिभंगललितं नियतप्रकाशं
गोविंदमादिपुरुषं तमहं भजामि ॥ ३ ॥ °

12 verses, after which: तदेवमिष्टदेवताप्रणामसुखेन नित्यं श्रीवैकुंठावस्थितश्रीकृष्णः श्रीमूर्तिरेव परमं तत्त्वं । °

Besides various *Purāṇas,* quotations are found from *Uktirahasya* [तत्र उक्तिरहस्ये यथा ।
ब्राह्ममुहूर्ते उत्थाय मन्त्री सुस्थिरमानसः ।
सेवेत मानमा(?मनसा) कृष्णं दिनं तद्वच्च यामिनीं ॥
भक्तिप्रदो मुक्तिदायी तथा काम्यफलप्रदः ।
चित्तानंदकरस्तत्र प्रकारः कथ्यते ऽधुना ॥
चिंतयेद्यामिनीं शेषचामीकरगृहोत्तमे ।
पर्यंके शयानं निद्रावशं परमपूरुषं ॥ °] fol. 33*b*; *Gautamīyatantra,* 27*b*; *Prabodhacandrodaya* [संमोहयंति मदयंति विडंबयंति निर्भर्त्सयंति रमयंति विषादयंति । ° *Pr.* I. 27], 7*b*; *Brahmasaṃhitā,* 1*b*; *Haribhaktikalpalatā,* 9*a*, 10*a*, etc.; *Haribhaktisudhodaya,* 3*a*, 5*b*, 6*b*, 20*a*.

Ch. I. treats of the nature and various grades of *Bhakti;* II. (beg. fol. 14*b*), of the efficacy of prayers addressed to *Krishṇa,* under his many different names; III., fol. 20*a*, gives a description of the *Vaishṇava* paradise, *Vaikuṇṭha,* and its delights; IV., fol. 33*a*, sets forth the means by which access is obtained to it, esp. certain symbolical practices.

It ends:

निर्भुग्नकाष्ठपाषाणतुल्यायामुक्तिवन्यया (विभुग्नकप°) ।
आनलरूपतास्याश्च न्यरसोरसभाग्भवेदिति (!) ॥
इति श्रीकृष्णभक्तिकल्पवल्ल्यां चतुर्थी मंजरी ॥

[H. T. Colebrooke.]

1798.

1174b. Foll. 40; size 13 in. by 5¾ in.; fairly written, in Devanāgarī; 6–11 lines in a page.

Mantrabhāgavatavyākhyā, or *Mantrarahasyaprakāśikā,* a treatise in four chapters, by *Nīlakaṇṭha,* son of *Govindasūri,* endeavouring, by interpretation of certain Vedic verses, to prove the Veda to relate to *Krishṇa.*

It begins:

सत्यं ज्ञानमनंतं यत्तद्विष्णोः परमं पदं ।
प्राप्तुं मंत्रेषु गोपालविष्णोः कर्माणि पश्यति ॥

See Aufrecht, Cat. Bodl., no. 734.

It ends:

वाक्यार्थे व्यासवाल्मीकी पदार्थे यास्कपाणिनी ।
रामकृष्णकथा मंत्रैर्गायतो मम नायकौ ॥ १ ॥
एतच्छतद्वयमृचां रामकृष्णकथानुगं ।
व्याख्यातं भगवांस्तेन तुष्यतात्सात्वतां पतिः ॥ २ ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकंठस्य कृतौ स्वोद्धृतमंत्रभागवतव्याख्यायां मंत्ररहस्यप्रकाशिकायां मथुराकांडश्चतुर्थः ॥ संवत् १८६२ मिति ज्येष्ठशुक्लपूर्णिमायां भौमवासरे मिदं पुस्तकं समाप्तं ॥ लिखितं शिवबालकचतुर्वेदीमिदं पुस्तकं ॥

मंत्रभागवतव्याख्याभिधं पुस्तकरत्नकं ।
भास्कराख्यस्य सुधियस्तेन तुष्यतुमापतिः ॥

On the outer page of the MS., and on the margin of the leaves, the treatise is called *Mantrabhāgavata.*

[H. T. Colebrooke.]

1799.

172. Foll. 335; size 12¼ in. by 5½ in.; fairly written, in Devanāgarī, in the latter part of last century (the last leaf by a more recent hand); twelve lines in a page.

Nityācārapradīpa, a compendium of *Vaishṇava* religious duties, by *Narasiṃha* (*Nrisiṃha*), son of *Murāri,* grandson of *Dharādhara Jaimini*(?), and disciple of (?his uncle) *Vighneśvara.*

It begins :

शाखाभिः सकलाभिरुक्तमहिमा नीलाद्रिमूलस्थितिः
पीनस्कंधधृतप्रसूनविभवः स्वानंदकंदोदयः ।
यः शोणाधरपल्लवो ऽथ विबुधैः सेव्यः श्रिया शोभितो
भक्तेभ्यो वितरन् फलं विजयते को ऽप्येष कल्पद्रुमः॥१॥

एकचूतविपिनस्य नायकं दर्शयन् क्षपितपुष्पसायकं ।
पुत्रभावगतसिद्धिनायकं संश्रये ऽभिमतसिद्धिदायकं॥२॥

रूपं दधत्यतिमनोहरनारसिंहं
दैतेयदारणपरं पुरुषे पुराणे ।
श्रेयः समादिशतु सागरसंभवायाः
सानंदविस्मितससंभ्रमदृक्निपातः ॥ ३ ॥

कालिंदीपुलिने कदंबसुतरोर्मूले मनोजाशुचा(r. ज्ञेशुचौ)
ज्वालाभिः कवलीकृतो ऽपि कथमप्याधाय धीरं मनः ।
स्वैरं वेणुमुदीरयन्नथ दृशा साकूतमालोकयन्
गोपस्त्रीपरिवेष्टितो दिशतु नः श्रेयः श्रियो नायकः॥४॥

अमत्सरः सत्समयप्रणेता कौत्सस्य वंशो वसुधावतंसः ।
प्रासादमीमांसकयज्ञयूपैर्येनोत्कलो भूषित एष देशः ॥ ५ ॥

प्रासादे स्वकृते हरिं परि[च]रन्नासीदमुष्मिन् कुले
मीमांसार्णवकर्णधारतरुणो मृत्युंजयः पंडितः ।
विद्याभिः सकलाभिरुज्ज्वलमतिर्यः शुद्धमुक्तावलि-
ग्रंथेनाखिलमेव पूतमकरोत्स्वीयं कुलं चेज्यया ॥ ६ ॥

अमुष्य पुत्रः किल गोपिनाथमिश्रो गुणैर्यस्य वशे वसंतौ ।
जलेशनारायणनामयोगात्पुत्रौ तु मित्रावरुणावुपेतौ॥७॥

अष्टाब्दे सुकविगीते च नवमो(l. मे) तर्काब्धिपारंगमो
मीमांसाद्वयसत्प्रबंधरचनासंपूर्तिकृद् द्वादशे ।
जल्पैरल्पदिनैर्विजित्य विदुषो यः षोडशे वत्सरे
योगाभ्यासरतः पुराणपुरुषं नारायणः प्राविशत् ॥ ८ ॥

सिद्धेश्वरी दत्तवरा स्वतंत्रा
षड्वर्गिनी(!) यस्य कुले [ऽ]चलासीत् ।
कापीवने ऽहीनमखाग्निचेता
जलेश्वरः कृष्णपरायणो ऽभूत् ॥ ९ ॥

नरसिंहधनंजयाभिधावथ गंगाधरतोन्यखंडलः(!) ।
तनयाः किल वाजपेयिनो ऽस्य च मृत्युंजयपंचमास्त्विमे [॥ १० ॥

अद्वैतागममुत्कले ऽवतरयन् संक्षेपशारीरके
कृत्वा वार्त्तिकमध्वरेषु निरतः षण्मासदीक्षाव्रती ।
मीमांसा यत एषु वृद्धिमगमत् काश्यां नृसिंहः सुर-
स्रोतस्विन्युदकैकजीवनविधिर्योगेन सिद्धिं गतः ॥ ११ ॥

देवानंदः सुतो ऽस्याजनि कृतचयनो यज्ञविद्याधुरीणो
वेदाभ्यासप्रयासात्परिपदिविजये यः कृतः पंडितेशः ।
नानादेशादुपेताः सुनिपुणमतयः संघशो यस्य शिष्या
मीमांसातर्कविद्याश्रुतिशिखरमतप्रौढिमध्यापयंति ॥१२॥

अनुजो ऽस्य च पुंडरीकयाजी
बलभद्रो विदितः श्रुतो न येन ।
सदृशः श्रुतिमौलिभट्टतंत्रे
किमु संवत्सरदीक्षया क्रतौ ॥ १३ ॥

अपरे [च] नृसिंहसूनव इह चत्वार उदारचेतसः ।
स्वकुलोचितविद्ययोर्जिताः सततं कृष्णकथापरायणाः॥१४॥

आनंदपुत्रा वसुतेजसो ऽष्टौ वसूत्तमाः किं वसुधामुपेताः ।
यदीयशिष्या अनवाप्तविद्या ये के ऽपि तल्लक्षणमांजतैव
सर्वे च पुत्रा विगतारिमित्रास् [॥ १५ ॥
ते वाजपेयादिमखैः पवित्राः ।
काले यथावद्विहिताग्निहोत्रा
महद्भिराशासितसच्चरित्राः ॥ १६ ॥

ते वामदेवाभिधवर्धमानौ
समाधवौ तौ भुवनेशवीरौ ।
धराधरस्यानु गदाधरश्चो
रविश्च तेषामिह चाष्टमो ऽभूत् ॥ १७ ॥

धराधर[ा]ख्याप्रथितस्य जैमिनेर्
जगन्निवासैकजुषो दशात्मजः(? जाः) ।
गरिष्ठविघ्नेश्वरनामसंवृतो
वशिष्ठ एव व्यजनिष्ट पूर्वजः ॥ १८ ॥

मुरारिपीतांबरवासुदेव-
नारायणश्रीपतिकेशवाख्याः ।
वक्रेश्वरश्रीजयदेवकृष्णाः
स्वाचारविद्यास्तनया नवान्ये ॥ १९ ॥

मुरारिपूजार्जितविद्ययोर्जितो
मुरारिरासीत्स्मृतिमौलिपारगः ।
निरंतरं श्रीनरसिंहसेवया
नृसिंहनामाजनि तस्य चात्मजः ॥ २० ॥

श्रीमद्विघ्नेश्वरगुरोः प्राप्तविद्येन तेन च ।
नित्याचारप्रदीपो ऽयं नृसिंहेन प्रणीयते ॥ २१ ॥

तत्र निमित्तोद्देशेन विहितं कर्म नैमित्तिकं। तन्मध्ये नियत-नैमित्तिकं यत्तन्नित्यमुच्यते । तत्र यावज्जीवमग्निहोत्रं जुहुयात् । अहरहः संध्यामुपासीत । अहरहर्जुहुयादा काष्ठात् । अहरह-र्भूतेभ्यो बलिं च हरेत् । इत्यादि नित्यं । ०

The work, which shows some Tantric tendencies, is divided into two parts, the first of which, consisting of one chapter, *Ācārakalpa*, ends fol. 87*b*. The second part, consisting of three chapters (*bhāgakrityam*) has a separate paging (foll. 248).

This portion begins:

गोवर्धनोद्धरणकर्मणि संप्रवृत्ते
गोपेषु विस्मितससंभ्रमसत्वरेषु ।
ब्रह्मांडधारणनियंत्रितरोमकूपः
कृष्णो ऽपि सस्मितमुखो भवतः पुनातु ॥
अथ द्वितीयभागकृत्यं ॥ दक्षः ।
'द्वितीये च तथा भागे वेदाभ्यासो विधीयते ।
वेदस्वीकरणं पूर्वं विचारो ऽभ्यसनं जपः ॥ १ ॥ °

Ch. II. ends fol. 80*a* (of orig. pag.); III., fol. 195*a*.

It ends: षडंचै जप्त्वा ऊर्ध्वमन्यज्जपेदिति स्तोत्रानंतरं सहस्रनामादि जपेदित्यर्थः ॥

मध्याह्ने गोपालपूजायां ध्याने विशेषः ।
वंद्यं देवैर्मुकुंदं विकसितरविमिंदीवराक्षं
गोगोपीवृंदवीतं जितरिपुनिवहं कुंदमंदारभासं ।
नीलग्रीवाग्रपिच्छाकलतस(?)विलसत्कुंतलं भानुमंतं
देवं पीतांबरं तं यजतु च दिनमध्यमे ऽह्नो रमायै ॥

इति श्रीमहामहोपाध्यायाग्निचिद्वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे चतुर्थभागकृत्यं समाप्तं ॥

The leaves are marked सिं° प्र° (*i.e.* सिंहवाजपेयीकृतप्रदीप acc. to the title given on the front and back pages).

Whatever the age of the work may be, it must be later than the middle of the 14th century, as the *Mādhavīya* is quoted at fol. 29*b*.

[H. T. Colebrooke.]

1800.

800a. Foll. 181; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; indifferent Devanāgarī writing, of the former half of the last century; eight lines in a page.

Sadācārasamgraha, a metrical treatise on the religious duties of a pious *Vaishṇava*, in nine chapters (*prakaraṇa*), largely compiled from *Purāṇas*, and here ascribed to *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha*.

It begins:

श्रीमत्स्यकच्छपवराहनृसिंहकुब्ज-
रामाभिरामहलधृग्गुधकल्किरूपान् ।
एको हिताय जगतः स्थितिभंगसर्गान्
धत्ते स मामवतु वाचमलंकरोतु ॥ १ ॥

भूभारक्षपणार्थाय वैभवानां हिताय च ।
भक्तसंरक्षणार्थाय यो ऽवतीर्णो यदोः कुले ॥ २ ॥

तं नमामि परात्मानं जगन्मोहनविग्रहं ।
यस्य प्रसादलेशेन कीर्त्यते सारसंग्रहः ॥ ३ ॥

दुर्ज्ञेयत्वादनंतत्वात् दुष्प्राप्यत्वाद्विचक्षणः ।
सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥ ४ ॥

तत्र प्रथमस्कंधे शौनकवाक्यं ।
मंदस्य मंदप्रज्ञस्य वयो मंदायुषस्य च ।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ ५ ॥
अतः सप्तमस्कंधे प्रह्लादः । °

I. *Dīkshāvidhānaprakaraṇa* ends fol. 11*a*; II. *snānādikriyāprakaraṇa*, fol. 43*b*; III. *pratimāśālagrāmalakshaṇaprakaraṇa*, fol. 58*b*; IV. *pūjāvidhāna*, fol. 95*a*; V. *śrībhāgavatamahimābhagavaddharmalakshaṇajīvasyasaṃsritivarṇana* fol. 113*a*; VI. *bhaktivibhāganāmamahimākīrtanavarṇana*, fol. 136*a*; VII. [*ekādaśī*-]*dvādaśīvratanirṇaya*, fol. 159*a*; VIII. *vārshikamahotsavaparvaṇi divyāvirbhāvavratavarṇana*, 170*a*. Chapter IX. (*vishṇubhaktivishayavarṇane vārshikaparvasu kriyāvidhānavarṇana*, acc. to Rāj. Mitra, Notices, I., p. 103) wants the end; a different hand having supplied (on a page pasted over the last one of the original MS.) a few lines with the (perhaps spurious) colophon: इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृते सदाचारसंग्रहनामको ग्रंथः समाप्तः ॥

In the MS. described by Dr. Rāj. Mitra, the author's name is not given.

[H. T. Colebrooke.]

1801.

1746b. Foll. 39; size 8½ in. by 4 in.; indifferent Devanāgarī writing, of about the middle of the last century; eleven lines in a page.

Pañcasaṃskāradīpikā, a manual of *Vaishṇava* rites of consecration (in accordance with the tenets of *Madhvācārya*), by *Vijayīndra Bhikshu*, pupil of *Surendra*.

It begins:

कल्याणगणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकेशाय श्रीनृसिंहाय ते नमः ॥ १ ॥

उर्व्यां सकर्णतां याति यद्गुणाकर्णने रतः(r. रतिः) ।
अर्णवगुणरत्नानां पूर्णबोधं तमाश्रये ॥ २ ॥

यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवेत जययोगींद्रं कामबाणच्छिदं सदा ॥ ३ ॥

यो व्यासमुनिदावाग्निः सच्छास्त्रमहता सह ।
ददाह कुमतारण्यं प्रकाशये(l. श्राय) तमाश्रये ॥ ४ ॥

श्रीसुरेंद्रगुरोः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिशोभिते ॥ ५ ॥

मध्वसिद्धांतशुद्धांतमंडलीभवदाकृतिः ।
क्रियते विजयींद्रेण पंचसंस्कारदीपिका ॥ ६ ॥

ननु तापादयः संस्कारा [ना]नुष्ठेयाः तत्कर्तव्यतायां प्रमाणाभावात् । न तावच्छ्रुतिस्तत्र ०

The five consecratory rites are names'-giving, the burning in (? of *Vishṇu's* attributes), the application of the sectarian marks (*paṇḍra*), the initiation into the mantra, and offering.

The handwriting is not very clear, and no ends of chapters are marked.

Fol. 2*b*: रामानुजाचैरानंदतीर्थायैर्विष्णुस्वामिसंप्रदायिभिरन्यैश्च बहुभिस्तदनुष्ठानात् । ०

It ends:

तापः पुंड्रं तथा नाम मंत्रो यागश्च पंचमः ।
अमी हि पंच संस्काराः परमैकांत्यहेतवः ॥

इत्यादि पंचरात्रोक्तं तेषां भगवद्भक्तिहेतुत्वमप्युपपन्नमिति न कश्चित्क्षुद्रोपद्रवः ॥

मध्वसिद्धांतशुद्धांतमंडलीभवदाकृतिः ।
कृतेयं विजयींद्रेण पंचसंस्कारदीपिका ॥

इति श्रीविजयींद्रभिक्षुविरचिता पंचसंस्कारदीपिका समाप्ता॥

On the outer page of the last leaf the title is given: पंचसंस्कारदीपिका विजयींद्रतीर्थैरामचंद्रस्य ।

[H. T. COLEBROOKE.]

1802.

2403b. Foll. 12; size 7½ in. by 5 in.; Bengalī handwriting, of the latter part of last century; twelve lines in a page.

Vrindāvanapaddhati, a brief manual of daily observances for the use of Brāhmaṇical students of the *Vaishṇava* sect, in accordance with the tenets of the followers of *Vallabhācārya*.

It begins:

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभानुजः सो ऽसौ श्रीरूपो जीवसंततिः ॥

अथ श्रीवृन्दावनपद्धतिः समासव्यासयोगतः । साधको ब्राह्मे मुहूर्ते चोत्थाय रात्रिवासस्त्यक्त्वाचम्य गुरुकुलं च नत्वा श्रीराधाकृष्णयोर्नामोच्चारणपूर्वकं शौचं गत्वा शौचं विधाय जलमृत्तिकया । ०

Fol. 11*a*: श्रीश्रीमद्गोस्वामिपादानां॥ अथ क्रमदीपिकायां।०

Apparently incomplete. [R. JOHNSON.]

1803.

785b. Foll. 15; size 9¾ in. by 4 in.; plain Devanāgarī writing; 9 or 10 lines in a page.

[*Vishṇumūrti-*] *Pratishṭhāvidhi*, a manual for the inauguration of images of *Vishṇu* and other deities; apparently part of a larger work, called *Vaishṇavadharmānushṭhānapaddhati* (or *Nrisiṃhaparicaryā* ?), by *Krishṇadeva*, son of *Rāmācārya*.

It begins: सुवर्णादिप्रतिमासु तु प्रतिष्ठैव भगवदाविर्भावाद्विधितः प्रतिष्ठा कर्तव्या ।

बौधायनादिसन्मूलास्त्रैविक्रम्यादिपद्धतीः ।
वीक्ष्य वक्ष्यामि विष्ण्वादिचलार्चास्थापनाविधिं ॥

तत्र प्रतिष्ठाकाल उच्यते । उदगयनं माघादिपंचसु मासेषु शुक्लपक्षे चतुर्थीषष्ठ्यष्टमीचतुर्दशीव्यतिरिक्तायां तिथौ °

इति प्राणप्रतिष्ठा fol. 7*a*; इति चलार्चाप्रतिष्ठा fol. 9*a*.

Fol. 11*a*: इति संक्षिप्तचलार्चाप्रतिष्ठाविधिः ॥ इति वैष्णवधर्मप्रतिष्ठाचार्यश्रीरामाचार्यवर्यसुतकृष्णदेवविर[र]चितायां वैष्णवधर्मानुष्ठानपद्धतौ नृसिंहपरिचर्यायां नवमः पटलः ॥ प्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छंदांसि क्रियामयवपुःप्राणाख्यदेवता । प्राणप्रतिष्ठायां विनियोगः °

Fol. 12*b*: इति प्राणप्रतिष्ठाविधिः समाप्तः । अथास्यानुक्रमणिका । ° seven *ślokas*, enumerating the sixteen purificatory actions (*saṃskārāḥ*) required on these occasions, ending:

> नवमूर्तिप्रतिष्ठायां संस्काराः षोडशोदिताः ।
> अनेन विधिना कुर्वंल्लभते भक्तिमुत्तमाम् ॥

श्रीविष्णुभट्टात्मजरुद्रेण लिखितं ॥

The last four leaves, which are paged separately, are headed (though in a different hand) *Vishṇumūrttinyāsapratishṭhādharma*, beginning: अथ षोडश न्यासान्कुर्यात् ॥ ओं ब्रह्मरूपमकारं पादयोर्न्यसेत् । ओं विष्णुरूपमुकारं हृदये । ओं रुद्ररूपं मकारं ललाटे । ओं भूः पादयोः । ओं भुवो हृदये । ओं स्वः ललाटे । ओं अ तालुके । ओं आ मुखे । ओं इ ई नेत्रयोः । ओं उ ऊ कर्णयोः । etc., a great variety of symbols (such as planets, months, yugas, castes, rivers, clouds, etc.) brought in connection with particular limbs; प्राणप्रतिष्ठापूर्वकमंगन्यासः । ततो जीवन्यासः ° fol. 3*b*.

Fol. 4*b*: इति विष्णुमूर्तिप्रतिष्ठाविधिः समाप्तः ॥

> एवं न्यासक्रमो यस्तु न जानाति नराधमः ।
> आचार्यो न स मंतव्यो निग्राह्यस्तस्करो यथा ॥

रात्रौ भूतबलिं दद्यात् । ° चतुर्भिः कलशैर्देवं शतवारमभिषिच्य भुवा द्यौरिति मंत्रेण तस्यां प्रतिमायां ॥ इति न्यासविधिः ॥ इति श्रीविष्णुभट्टात्मजरुद्रभट्टेन श्रीविष्णुमूर्तिप्रतिष्ठा परोपकारार्थं लिखिता ॥ संवत् १६७५ ॥

[H. T. Colebrooke.]

1804.

1747. Foll. 56; size 8½ in. by 3¾ in.; fairly good, modern Devanāgarī writing; seven lines in a page.

Śālagrāmaparīkshā, a treatise on *Śālagrāma* stones, describing their colour, shape and properties, and the places where they are found; by *Śaṅkara Daivajña*.

It begins:

> नमस्कृत्य हरिं वंदे विश्वव्यापिनमीश्वरं ।
> शालग्रामपरीक्षेयं प्रचक्ष्महे समासतः ॥ १ ॥

धर्मसंहितायां ।

> हिरण्यगर्भो भगवानाद्यो नारायणः स्वयं ।
> वज्रकीटप्रभुत्वात्स चचार वसुधातले ॥ २ ॥

The sacred stones are classified, according to the number of *cakras* they present, from one to twelve, then those which have more (*bahucakramūrti*), and finally those which have none at all (*acakramūrti*). The name is usually misspelt सालिग्राम.

Fol. 50*b*: इति एकचक्रमूर्तिवर्गः ।

> एवं निरूपिते वर्गे लक्षणं हि यथा तथा ।
> विचार्य यद्बुधैः सम्यक् क्षम्यतां मम साहसं ॥

इति शंकरदैवज्ञविरचिता शालग्राममूर्तिलक्षणपद्धतिः समाप्ता॥

Then follows another chapter, containing a sort of recapitulation of the first, beginning:

> श्रीकृष्णगोपिकानाथं प्रणम्य जगतां प्रभुं ।
> ग्रंथान्बहून्समालोच्य गृह्यते ऽत्र क्वचित् क्वचित् ॥

विष्णुना गरुडायोक्तं ।

> शालग्रामशिलाभेदं ग्राह्याग्राह्यफलं तथा ।
> द्वारमानं तथा(? तथा) क्षेत्रं मूर्तीनां लक्षणं ततः ॥

It ends:

> श्रीवत्सलांछनोपेतो मालया परिवेष्टितः ।
> अंकुशध्वजसंयुक्तो लक्ष्मीनारायणो हरिः ॥

इति सालिग्रामपरीक्षा समाप्ता ॥

> कामासक्तो ऽथवाक्रुद्धः सालिग्रामशिलार्चनात् ।
> भक्त्या वा यदि वाभक्त्या कलौ मुक्तिमवाप्नुयात् ॥

> शिलाप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत् ।
> यथा यथा शिला सूक्ष्मा तथा स्यात्तु महत्फलं ।
> तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये ॥

[H. T. Colebrooke.]

1805.

947b. Foll. 6; size 11¾ in. by 4½ in.; clear Devanāgarī writing; nine lines in a page.

Śālagrāmaśilādānapaddhati, a short treatise, by *Bābā Deva*(?), on the different kinds of *Śālagrām* stones, and the ceremonies connected with their presentation to worshippers of *Vishṇu*.

It begins: श्रीरामो जयति जगत्त्रयैकहेतुः॥ अथ शालग्रामलक्षणं॥

द्वारमेकं चतुश्चक्रं वनमालाविभूषितं।
सुवर्णतालुं कृष्णाभं लक्ष्मीनारायणं विदुः॥ १॥
नानावर्णमनंतं च नागभोगेन चिह्नितं।
अनेकमूर्त्तिसंकीर्णं सर्वकामफलप्रदं॥ २॥
वर्तुलं वलयाकारं स्वर्णविंदुविभूषितं।
तूणगांडीवमाश्रित्य श्रीरामसंज्ञकः(? ०कं) परं॥ ३॥
चक्रं च दृश्यते यत्र वाणतूणधनुर्धरः।
कौशल्यानंदनो रामस्तृतीयः परिकीर्त्तितः॥ ४॥
वैकुंठं स्वर्णपूर्णाभं चक्रमेकं तथांबुजं।
द्वारोपरि तथा रेखा गुंजाकारा सुशोभना॥ ५॥
श्रीधरं च तथा देवं वेष्टितं वनमालया।
कदंबकुसुमाकारं रेखापंचसमन्वितं॥ ६॥

० ३४॥ इति शालग्रामचक्रलक्षणं। fol. 3*a*; इति श्रीभविष्योत्तरपुराणे गंडकीशिलामाहात्म्ये श्रीकृष्णयुधिष्ठिरसंवादे शालग्रामस्तोत्रं संपूर्णं fol. 4*b*.

Fol. 5*a*: अथ शालग्रामदानं मदनरत्ने हरिवंशे॥

चतुःसागरपर्यंतां सशैलवनकाननां।
दत्त्वा यत्फलमाप्नोति शालग्रामात्तदश्नुते॥
शालग्रामशिलादानमतिदानं प्रकीर्तितं।
शालग्रामं तथा लिंगं यो ददाति कुरूद्वह।
मम लोकमवाप्नोति शिवदानप्रदानतः॥

पाद्मे। शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमं। ०

इति शालग्रामदानविधिः॥ अथ प्रयोगः। fol. 5*b*.

Colophon: इति बावादेवीया शालग्रामशिलादानपद्धतिः समाप्ता॥ संवत् १८५८ समयनाममार्गशीर्षेकृष्ण अष्टम्यां ८ सनिवासरे॥

[H. T. Colebrooke.]

1806.

1997. Foll. 65 + 9; size 8½ in. by 4 fair Devanāgarī writing (Europ. paper mar *'Giormagnani'*); nine lines in a page.

Mānasapūjā (or *Gaṇeśapūjā*), consisting directions for private devotional practic esp. relating to the worship of *Gaṇeśa*, w extracts from various *Purāṇas* bearing there

It begins: श्रीमन्महागणपतये हरिहरात्मकाय सि बुद्धिसहिताय गुरुभ्यो नमः॥

सुमुखश्चैकदंतश्च कपिलो गजकर्णकः।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥

श्रीकृष्ण उवाच॥

एवं जीवं समुत्पन्नं ध्यायेत पुरुषोत्तमं।
अनंतादित्यसंकाशं वासुदेवं चतुर्भुजं॥ १॥ ० ११॥

इति श्रीवामनपुराणे कृष्णयुधिष्ठिरसंवादे मानसस्नानस्तो संपूर्णं fol. 2*b*; इति श्रीगणेशपुराणे श्रीकृष्णनारदसंवाद गणेशकवचं समाप्तं fol. 5*b*.

From fol. 7*b* directions for daily devotional practices: प्रातरुत्थाय त्वदमितोदारनामस्मृत्यनंतरं। नानास्वरूपधरं त्वामेव नमामि।

सर्वाज्ञानतमोभेदभानवे चित्स्वरूपिणे।
प्रातर्नमस्ते भगवन् विशुद्धब्रह्मरूपिणे॥ ० 27 *ślokas*.

इति प्रातःस्मरणं विधाय सूर्योदयात्प्राक् घटिकावकाशमवलंब्य गंगातीरमागत्यैकांतस्थानगमनोत्तरं मुखप्रक्षालनं विधाय स्वस्थमानसो भूत्वा यथाविधि।

ईशानेत्यादिमंत्रेण भस्मस्नानोत्तरं तथा।
गोमयस्नानमित्युक्तं गंधद्वारमनेन तु॥ ०

इत्याचमनं 11*b*; इति पयःस्नानं। ० दधिस्नानं। ० घृतस्नानं 12*a*; इति मधुपर्कं 13*a*, etc.

इति श्रीभागवते दशमस्कंधे देवस्तुतिर्नाम सप्ततितमोध्यायः 39*a*; इति श्रीपद्मपुराणे गणपतिसहस्रनामस्तोत्रं 54*b*; इति गणेशस्तोत्रं 58*b*; इति गणेशायर्वशीर्षस्तोत्रं 60*b*; this portion ends with another extract from some unspecified work.

The last section, separately paged (1–9), entitled *Mānasapūjā*, begins:

श्रीमत्कामाभिरामं सकलकविकलाकल्पवृक्षालवालो-
भूतं दृक्पाततापत्रितयततितमिस्रापहंतृप्रतापं ।
सद्विद्यासिद्धिबुद्धिप्रदमरुणरुचिं चित्सु कं संवहंतं
त्र्यक्षं चंद्रार्धचूडं सकलसुरनुतं भावये श्रीगणेशं ॥ १ ॥
सुरत्नालिभूपोल्लसद्बाहुदंडं ० ॥ २ ॥
हे भगवन् त्वत्कृपातो मद्बुद्धौ ० ॥ ३ ॥ ० ८ ॥
सुगमोपायभूतं पूजनं यदुक्तं तदेव वर्ण्यते । ०

It ends:

भक्तार्तिभीतिगाढांध्यध्वंसमार्तंड ते पदं ।
प्रपन्नो ऽस्मि भवारण्यभीतस्त्वं त्रातुमर्हसि ॥

मानसपूजा समाप्ता ॥ then follow two stanzas: श्रीमन्नजास्यपदसारसभृंगचेताः ० ॥ १ ॥ स्वप्नावभासममलं स्वराजमेनं ० ॥ २ ॥

[Dr. John Taylor.]

1807.

819A. Foll. 83; size 15¾ in. by 5 in.; indifferent Bengalī handwriting; 8 or 9 lines in a page.

Gaṅgāvākyāvalī, a treatise on the religious advantages of worshipping the river Ganges, of visiting it, and bathing therein etc., composed by *Vidyāpati*, under the patronage of *Viśvāsadevī*.

It begins:

स्वस्त्यस्तु वस्तुहिनरश्मिभृतः प्रसादाद्
एकं वपुः श्रितवतो हरिणा समेत्य ।
तत्राभिपङ्कजसहोत्थमृणाललीलाम्
आविष्करोति हृदि यस्य भुजङ्गराजः ॥

It ends:

कियन्निबन्धमालोक्य श्रीविद्यापतिसूरिणा ।
गङ्गावाक्यावली देव्याः प्रमाणैर्विमलीकृता ॥

इति समस्तप्रक्रियाविराजमानदानदलितकल्पलताभिमानभवभक्तिभावितबहुमानमहामहादेवीश्रीमद्विश्वासदेवीविरचिता गङ्गावाक्यावली समाप्ता ॥ शकाब्दाः १७२९ ॥

Regarding the author, see Rāj. Mitra, Notices, III., p. 235. See also Aufrecht, Cat. Bodl., no. 708.

[H. T. Colebrooke.]

1808.

1059. Foll. 12; size 14¾ in. by 3¼ in.; folded to half the length; written in the Bengalī character, about the end of the 16th century; 11 or 12 lines in a page.

Praṇavakalpa, a treatise on the nature and mystic import of the sacred syllable *Om*, ascribed to *Śaunaka*; with a commentary, by *Hemādri* (?from the *Caturvargacintāmaṇi*).

It begins: तत्र प्रणवप्रशंसा शौनकः ।

ओमिति ब्रह्मोमितीदमोमित्युक्तीयमक्षरं ।
प्रणवो हि परं ब्रह्म प्रणवश्चापरं स्मृतं ॥
एतेनैकतरं विद्वानुपासीनः प्रपद्यते ।

तथा च तैत्तिरीयश्रुतिः । ओमिति ब्रह्म ओमितीदं सर्वं ओमित्येतदनुकृतिर्ह स्म वा अप्योश्रावयेत्याश्रावयन्तीत्यादि । यद्ब्रह्म जगज्जन्मादिकर्तृ स ओमिति शब्द एव न ततो भिद्यत इत्यर्थः । तथा इदं सर्वं विकारजातं ओंकार एव नान्यदित्यर्थः । तथा माण्डूक्योपनिषदि श्रूयते । ० — ॥ तथा च शौनकः ।

अतः परं प्रवक्ष्यामि प्रणवमात्रयात्मतां ।
त्रैविध्यं यद्विदित्वैव मोक्षमृच्छन्ति योगिनः ॥
त्र्यक्षरस्त्रिस्वरश्चैव त्रिमात्रश्च त्रिवर्णकः ।
त्रिस्थानश्च त्र्यवस्थश्च त्रिब्रह्मा त्रिमुखस्तथा ॥ ०

It ends:

अर्चनोपचारभूतहोमस्य संख्याविशेषमाह ।
अष्टाविंशतिमष्टौ वा हुत्वा पापात्प्रमुच्यते ।

अहन्यहनि देवार्चनसमये दध्यादीनामन्यतमेन अष्टाविंशतिमष्टौ वा आहुतीर्हुत्वा पापात्प्रमुच्यते० एवं निष्कामस्य जपार्चनध्यानसमाधीन् कृत्वा फलमाह ।

क्रमेण नित्याभ्यासादधिकारीह मोक्षे ॥

एवं हि । नित्यं जपादेरभ्यासात्क्रमेण शनैः शनैः आत्यन्तिककाले विद्याकर्मबन्धध्वंसलक्षणे मोक्षे ऽधिकारीश्वरो भवति ॥ इति शौनकीयप्रणवकल्पः हेमाद्रिणा व्याख्यातः ॥

[H. T. Colebrooke.]

CORRECTIONS AND ADDITIONS.

Page 14*a*, ll. 6, 13, read, *Abhinava-Nārāyaṇendra* (अभिनव °).

... 42*a*, l. 10. The *Āśvalāyana(gṛihya)kārikās* are ascribed to *Kumārila-bhaṭṭa;* cf. Burnell, Tanjore MSS., p. 14*a*.

... 67*a*, ll. 1, 2, read, *Rāmakṛishṇa* of Kāśī, son of *Konera* (son of *Prayāga-bhaṭṭa*, grandson of *Anantaśarman*), and paṇḍit to *Vijayasiṃha*. See p. 560*a*, note.

... 68*a*, l. 27, for अड्डे read अब्दे.

... 71*a*, l. 6, after 'cf.' insert, no. 293, above.

... 84*b*, l. 10 after, *Rāmacandra*, add, son of *Sūryadāsa*, and grandson of *Śaivadāsa*.

... 85*a*, l. 5 seq. This seems to be the continuation of no. 412.

... 87*a*, l. 20, for वतंसे read वसंते.

... 92*b*. The *Chandogapariśishṭa* is here erroneously ascribed to *Keśava Miśra*, on the strength of Colebrooke's statement, in the preface to his Digest (Misc. Ess., 2nd ed., I., p. 471, 'The *Chandoga-pariśishṭa* by *Keśava-miśra*,' a celebrated philosopher, and its commentary named *Pariśishṭa-prakāśa*, are works of great authority.'). The work is, in fact, identical with the *Karmapradīpa*, ascribed to *Kātyāyana* (*Dharmaśāstrasaṃgraha* I., pp. 603–644); and nos. 450 and 451 should accordingly have been given after nos. 460–463. See quotations at p. 521*a* of this Catalogue. Moreover, the *śloka* गोशालायां ° in the explanation of which the MS. is stated to terminate, would rather seem to belong to the *Vaśishṭha Chandogya-gṛihyapariśishṭa*, from which another quotation is given shortly before, fol. 130*b* तथा च वशिष्ठोक्तं छन्दोग्यगृह्यपरिशिष्टं । अथ वृषोत्सर्गविधिं व्याख्यास्यामः । कार्त्तिक्यां पौर्णमास्यां ° (see *Raghunandana's* Institutes, I., p. 299; गोशालायां ° ib., p. 301, where the work is called *Chandoga-pariśishṭa*). The last *śloka* of *Kātyāyana's* work occurring in the MS. (fol. 129*b*) is पर्वभिश्चैव गानेषु ° (*Dharmaś.*, last *śloka* of *khaṇḍa* 27, p. 641). But, unless *Nārāyaṇa's Prakāśa*, in the latter part of the work, confines itself to isolated glosses, there must here be considerable omissions, as the next preceding *śloka* (fol. 128*b*) is सकृदप्यष्टकादीनि ° (*Dharmaś.* 26, 15).

... 103*a*, l. 26, read, *Viśvanātha*.

... 137*b*, l. 6 (if indistinct), read, *Bāla*.

... 189*b*, l. 3, read, आसीत्कूर्मगिरौ.

... 226*a*, ll. 4, 16, 22; *b*, ll. 2, 6, 11, 21: for आर्त्ति ° we have probably to read आर्त्ते °; also *b*, l. 4, कौमुदेः श्रीहरेर्वाचस्पतेस्तस्य कुलोद्भवः ।

... 249*b*, l. 27, read, युद्धवीरो.

... 262*a*, l. 15, read, *Rāmānanda;* ib. 34, to *Bhaṭṭikāvya* add, *Sargas* 1–6.

... 271*b*, last line, add, Bhandarkar, Rep. 1883-84, p. 61, seq.

... 287*b*, l. 7, connect फणीतितटिनीनिकटे.

... 304*a*, l. 21, for A.D. 1740, read, A.D. 1684 (Saṃvat 1741).

Page 310*a*, l. 4 from bottom, read, *Harihara.*

... 318*b*, l. 2 from bottom, after *Śubhaṃkara*, add, son of *Śrīdhara.*

... 319*a*, l. 11, read, सङ्गीतकल्पवृक्षे.

... 324*b*, l. 22, add, Pischel, Gött. Gel. Anz., 1885, p. 766 seq.

... 330*a*, l. 11, for—son of *Nemikumāra* and *Mahādevī* or *Vasundharā*—read, [son of *Soma*]. The work has been edited, together with *Vāmana's Kāvyālaṃkāra-Sūtravṛitti*, and the *Sarasvatī-kaṇṭhābharaṇa*, by *Anundoram Borooah* (1883); but neither this edition, nor Prof. Zachariae's review of it in the Göttinger Gel. Anz. (1884, p. 300 seq.)—where this *Vāgbhaṭa* is shown to be a different writer from the author of the *Alaṃkāratilaka* (no. 1157)—was accessible to the Editor at the time when those sheets passed through the press. The descriptions of nos. 1153–58, 1183–87, and 1231-32, recognizable by fuller details regarding the contents of the works, were drawn up by Dr. Haas; some of the initial and final verses having been added in the final redaction.

... 331*b*, l. 8, omit, 'author's.'

... 332*b*, l. 27, read, राहडस्य.

... 391*b*, l. 23. This recension of the *Likhita-smṛiti* is actually called *Dālbhyasmṛiti*, in a MS. described in Rāj. Mitra's Bikāner Cat., p. 372.

... 417*a*, last three lines, the *Hṛidayanārāyaṇa* of *Rajk. Sarvadhikari's* enumeration seems purely imaginary and should be struck out; the line (acc. to Cat. no. 1500; Aufrecht, no. 718; Rāj. Mitra, V., p. 202) being: *Bhaveśa*

Harasiṃhadeva

Darpanārāyaṇa (wife *Hīrā*)

Harinārāyaṇa *Candrasiṃha* (wife *Lakhimā Devī*)

|

? *Rūpanārāyaṇa*

|

(*Rāmabhadra*) } cf. Cat. no. 1730.

... 417*b*, note. The *Vācaspati*, who was the son of *Keśava*, and father of *Lakshmīdāsa*, acc. to Prof. Aufrecht, was an astronomer of that name. Prof. Aufrecht is also of opinion that there were at least two Jurists of the name of *Vācaspati.*

... 489*b*, l. 17, to, *Aṇahillapāṭaka* add—i.e. *Aṇhilvāḍ Pāṭan*, the Patan (on the Sarasvatī, in Baroda) of our maps.

... 527*b*, l. 23; separate नोपरि शोलितो.